SANSKRIT SAHITYA PRISHAT

VOL 13 1985 G.K.U.

080532

Reg. No. C. 1073


Vol. XVIII, No. 9] ary, 1936.

१८५७ शकीये पौषे स्य ९म-संख्या



संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्



सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by
Dinabandhu Sahityashastri
The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.

Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

संस्कृतपद्यवाणी

[सचित्रा विचित्रगद्यपद्यमयी त्रैमासिकी संस्कृतपत्रिका]

सम्पादकः—श्रीकालीपदतर्काचार्यः

अस्याः प्राप्तिस्थानम्—संस्कृतपद्यवाणीकार्यालयः

२।१ रामकृष्ण लेन, वाग्वाजार, कलिकाता।

—:०:—

एषा पत्रिका प्रतिवर्षं नियमेन चतुरो वारानात्मानं प्रकाशयति। अत्र विशिष्टशिष्टगोष्ठीसम्मता दर्शनकाव्यालङ्कारादिसम्बन्धिनो निबन्धाः, सुललिताः कविताः, पद्मबन्धादिचित्रकाव्यानि, यमकादिविचित्रपद्यानि, सुप्रसिद्धभाषान्तरीणगद्यपद्यमयकाव्यानुवादाः, बङ्गभाषासंस्कृतभाषयोस्तुल्यरूपा गाथा, बङ्गभाषादिप्रथितच्छन्दसा सुरचिताः संस्कृतकविताः, प्रहेलिका-समस्या-तत्पूरणादयः सामयिकवृत्त-ग्रन्थसमालोचनादयश्च विषया अनुरूपया सरलया मधुरया च संस्कृतभाषया प्रकटीक्रियन्ते। अन्तरान्तरा च प्रथितयशसां महाजनानां चित्राणि विचित्राणि चरित्राणि च प्रकाश्यन्ते।

इत्थमेषा पत्रिकान्तरविलक्षणैः संख्यातीतगुणगणैः समन्विता 'संस्कृतपद्यवाणी' स्वल्पमात्रकेणैव कालक्रमेण सहृदयानां सुप्रसिद्धपत्रिकासम्पादकानां परेषामशेषाणां विद्वज्जनानां संस्कृतप्रियाणां विद्यार्थिनाञ्च हार्द्दिकीं प्रशस्तिपरम्परामासाद्य सुतरां यशस्विनी संवृत्ता।

तदलं विलम्बेन। सर्वे संस्कृतवाणीप्रियाः सत्वरमस्या ग्राहकपदमङ्गीकृत्य समास्वादयन्तु संस्कृतभारत्याः सुदुर्लभप्रचारां विचित्ररसधाराम्, पत्रिकायामस्यामौदासीन्यवन्तो मा भूवन वञ्चिताः पुनर्महतां भोग्येन सौभाग्येनेति प्राप्तकालमावेदनम्।—

अस्या वार्षिकं मूल्यम्—साधारणग्राहकाणाम्—१॥० सार्द्धरूप्यकम्

सहायकानाम्—३) रूप्यकत्रयम्

परिपोषकाणाम्—५) रूप्यकपञ्चकम्

सहायकानां परिपोषकाणाञ्च नामानि यथाकालं नियमेन पत्रिकायां प्रकाश्येरन्। एतदधिकसाहाय्यदातारः 'समाश्रय'पदं लभेरन्।

विनीतनिवेदक—श्रीगोपालचन्द्रतर्कतीर्थस्य

(संस्कृतपद्यवाणीप्रयोजकस्य काशीस्थस्य)

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

January, 1935.	१८५७-शकीये पौषे १८श-वर्षस्य ९म-संख्या	Vol. XVIII No. 9

मृच्छकटिके व्यवहारप्रकरणम्

यानि खलु रूपकरत्नानि भाषासौष्ठवेन भावगाम्भीर्येण रसविलासेन वृत्तबाहुल्येन च जगति बहुमानास्पदतामनुप्राप्तानि तेष्वेवेदमन्यतमं मृच्छकटिकसमाख्यं प्रकरणम्। अस्य च रचयिता शूद्रको वा भवतु, भासो वा भवतु अन्यो वा कश्चन भवतु सर्वथा तस्य नैपुण्यमनितरसाधारणमेव। प्रकरणस्यास्य नवमेऽङ्के मृषाभियुक्तस्य चारुदत्तस्याधिकरणे व्यवहारः सरसमधुरया भङ्ग्या समुपवर्णितः। यद्यपि स्मृतिशास्त्रेषु प्रायेण व्यवहारप्रकरणं विलसत्येव, तथापि न खलु ततः सुखेनैव तदानीन्तनी विचारशैली शक्यतेऽधिगन्तुम्। अन्या हि वर्णनप्रणाली कविप्रजापतीनाम्। ते हि समतिक्रान्तमपि कालं प्रभवन्ति प्रत्यक्षतां नेतुम्। अत एव नैतदाश्चर्यं यन्मृच्छकटिकस्थो नवमाङ्कः प्राचीनकालीनव्यवहारस्यावितथं चित्रमस्माकं पुरतः प्रसारयति।

तत्र प्रथमतस्तावदधिकरणिकेन प्रसादरम्येण श्लोकत्रितयेन *व्यङ्ग्य-मर्यादया स्वकार्यस्यातिदुःसम्पादत्वं प्रकाश्यते। एतेन चाधिकरणिकवचनेनाचिरादेव न्यायस्य विपर्यासो भविष्यतीति संसूच्यते।

श्रेष्ठिकायस्थाभ्यामनुगम्यमानोऽधिकरणिकः शोधनकेन निर्दिष्टमधिकरणमण्डपं संप्रविश्य कः कार्यार्थीति जिज्ञासमानो "राजश्याल एव प्रथमं कार्यार्थी"त्यवगच्छन् व्यवहारवैयाकुलीमाशङ्कमानः 'न खल्वद्य ते व्यवहारो दृश्यते' इति तं विज्ञापितवान्। ततश्च भगिनीपतिसाहायकेन त्वामधिकारादपसार्यान्यं कञ्चन त्वत्पदे प्रतिष्ठापयिष्यामि इति भीषितः 'आगच्छ दृश्यते ते व्यवहार' इति शोधनकमुखेन तमाहूतवान्। शकारेण

---

* अहो व्यवहारपराधीनतया दुष्करं खलु परचित्तग्रहणमधिकरणिकैः।

छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं
स्वान् दोषान् कथयन्ति नाधिकरणे रागाभिभूताः स्वयम्।
तैः पक्षापरपक्षवर्धितबलैर्दोषैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः॥

अपि च

छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान् दोषान् कथयन्ति नाधिकरणे सन्तोऽपि नष्टा ध्रुवम्।
ते पक्षापरपक्षदोषसहिताः पापानि संकुर्वते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः॥

यतः। अधिकरणिकः खलु

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन-
स्तुल्यो मित्रपरस्वकेषु चरितं दृष्ट्वैव दत्तोत्तरः।
क्लीबान् पालयिता शठान् व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे परतत्त्वबद्धहृदयो राज्ञश्च कोपावहः॥

चागत्य विविधाभिश्चेष्टाभिः स्वमाहात्म्यं प्रकटय्याधिकरणिकेन निर्वन्धेन पृष्टेनान्ततः पुष्पकरण्डकोद्याने दैवयोगेन स्त्रीशरीरं निपतितमवलोकितमित्युक्तम्। ततश्च 'अपि ज्ञायते का स्त्री विपन्नेति' पृष्टः प्रत्युवाचासौ वर्वरः—केनाप्यर्थलोभेन बाहुपाशबलात्कारेण वसन्तसेना मारिता न मयेति। Qui s'excuse, s'accuse इति न्यायेन न मयेति वचनं विस्पष्टमेव तदीयापराधं प्रतिपादयतीत्यधिकरणिकेन न मयेति व्यवहारपदस्य विलेखनाय सन्दिष्टः श्रेष्ठी। शकारस्तु मूढमतिरपि समुन्नीताधिकरणिकाशयः 'ननु भणामि मया एव दृष्टा' इति वचनोपन्यासपुरःसरं पादेन लिखितं प्रोञ्छितवान्। ततश्चाधिकरणिकेन कुशाग्रीयधिषणेन कथं त्वया ज्ञायते सा अर्थनिमित्तं बाहुपाशेन व्यापादितेत्यनुयुक्तेन दुर्वृत्तेन कथितम् 'उच्छूनेन ग्रीवास्थानेनाभरणशून्येन चाभरणस्थानजातेनैवं मयोहित'मिति। ततश्च वसन्तसेनामातरमवलम्बते व्यवहार इति निर्णीते तस्याः समाह्वानाय प्रेषितः शोधनकः। अधिकरणे समाहूतस्य बलिष्ठस्यापि वेपते हृदयं किं पुनः स्त्रिया इत्यधिकरणिकेन स्वधर्मं परिपालयतोक्तम् वसन्तसेनामातरमनुद्वेजयन्नाह्वयेति। ततश्च समागतायां वृद्धायां महतायासेन पुनः पुनरनुयोगेन च 'श्रेष्ठिचत्वरे निवसत आर्यचारुदत्तस्य गृहे यौवनसुखं निर्वेष्टुं गता वसन्तसेना' इति अवगम्य व्यवहारोऽयं चारुदत्तमवलम्बते इति निर्णीतमधिकरणिकेन। ततश्च तदाज्ञया वसन्तसेनार्यचारुदत्तस्य गृहं गतेति विलिखितो व्यवहारस्य प्रथमः पादः शोधनकेन।

अहो माहात्म्यं साधूनाम्! एवं वसन्तसेनामातुर्वचनश्रवणसमनन्तरमपि न प्रासरदिव मनोऽधिकरणिकस्य साधुतमस्य चारुदत्तस्य तत्र समाह्वाने। अन्ततश्चागतिकतया व्यवहारानुरोधेन तस्याऽऽह्वानाय प्रेषितः शोधनकः—आर्यचारुदत्तं स्वैरमसम्भ्रान्तमनुद्विग्नं सादरमाह्वय प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति। अत्र विशेषणानि विशेषतो दृष्टिं समाकर्षन्ति। महापुरुषो ह्यनुरूपेणोपचारेणोपस्थातव्य इति। ततश्च शोधनकमुखादवगतवृत्तान्त

*आरूढबहुप्रतर्कोऽपरिच्छेदाकुलमानसः तत्तदपशकुनसन्दर्शनसम्भ्रान्तहृदयः† प्रविवेशाधिकरणमण्डपमार्यचारुदत्तः ।

प्रथमत एवाधिकरणमण्डपस्य सुषमामभिसमीक्ष्योक्तम् अहो अधिकरणमण्डपस्य परा श्रीः । इह हि—

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्खाकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिनिचितं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥

ईदृशं दूतचारादिसङ्कुलं पापिष्ठजनपरिचितं धर्माधिकरणं कस्य वा नोद्वेगं समुपजनयति मनसि सहृदयस्य । अत एव नैतदाश्चर्यं यत

---

* ज्ञातो हि किं नु खलु बन्धनविप्रमुक्तो मार्गागतः प्रवहणेन मयाऽपनीतः ।
चारेक्षणस्य नृपतेः श्रुतिमागतो वा येनाहमेवमभियुक्त इव प्रयामि ॥९॥

† रूक्षस्वरं वाशति वायसोऽयममात्यभृत्या मुहुराह्वयन्ति ।
सव्यं च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि वेदयन्ति ॥१०॥

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥१२॥

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः
स्फुरितविततजिह्वः शुक्लदंष्ट्राचतुष्कः ।
अभिपतति सरोषो जिह्मिताध्मातकुक्षि-
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥१२॥

स्खलति चरणं भूमौ न्यस्तं न चाऽऽर्द्रतमा मही
स्फुरति नयनं वामो बाहुश्च मुहुर्विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं न चात्र विचारणा ॥

सम्भ्रमातिरेकाच्चारुदत्तस्य शिरस्तत्रत्ये दारुणि प्रहतम्। तेन चेदमपरमप्यपशकुनं समीक्ष्य समाकुलान्तरात्मनोक्तम्—

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः ॥१५॥

इति।

तत्र च प्रविष्टस्य तस्य* दर्शनमात्रेणैवावगतहृदयमाहात्म्येनाधिकरणिकेन स्वागतासनदानादिना सम्भावितः, पृष्टश्च अस्ति भवतोऽस्या आर्याया दुहित्रा सह प्रसक्तिः प्रणयः प्रीतिर्वा। ततश्चाङ्गुलिनिर्देशेन सन्दर्शिता वसन्तसेनाया माता चारुदत्तेनोत्थायाभिवादिता। व्यतिकरेणानेन विस्मयमानमानसेन पृष्टश्चारुदत्तोऽधिकरणिकेन—आर्य, गणिका तव मित्रमिति ? ततश्च लज्जया विस्पष्टं वक्तुमशक्नुवन् प्रकारान्तरेण प्रोवाच भो अधिकृताः, मया कथमीदृशं वक्तव्यम्, यद्गणिका मम मित्रमिति। अथवा यौवनमत्रापराध्यति न चारित्रम् इति।

समाजेषु वैदग्ध्यस्येदृशस्य समादृतत्वेऽपि व्यवहार ईदृशं वचनमवलम्ब्य न प्रवर्तते इत्यधिकरणिकेन

व्यवहारः सविघ्नोऽयं त्यज लज्जां हृदि स्थिताम्।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते ॥

इति—मुहुर्निर्बद्धेन चारुदत्तेन प्रतिपन्नं गणिका स्वं मित्रमिति। ततश्चाधिकरणिकेन, आर्य, वसन्तसेना क्व गतेति पृष्टः गृहं गता इति प्रत्युवाचासौ। ततश्च श्रेष्ठिकायस्थाभ्यामनुयुक्तः—कथं गता, कदा गता गच्छन्ती वा केनानुगता इति चारुदत्तः स्वगतं वितर्कयंश्चिरयंश्च शङ्कास्थानं सञ्जातः। ततश्च पुनः पृष्टेन तेनोक्तम्—गृहं गतेति। अवसरे

* घोणोन्नतं मुखमपाङ्गविशाललनेत्रं नैतद्धि भाजनमकारणदूषणानाम्।
नागेषु गोषु तुरगेषु तथा नरेषु न ह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥१६॥

चास्मिन् दुर्वृत्तेन शकारेणोक्तम्, मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्यार्थनिमित्तं बाहुपाशबलात्कारेण मारिता। तच्छ्रुत्वा तेन सक्रोधमधिक्षिप्तः शकारः*। तद्दर्शनेनाधिकरणिकेनापि तस्य निरपराधत्वं प्रतीतम्। विस्पष्टमेव चोक्तं न खल्वार्यचारुदत्ते सम्भवतीदृशोऽपराधः† इति। ततश्चारुदत्ते बद्धपक्षपात इति शकारेणाक्रुष्टोऽधिकरणिको निपुणं तमुपालेभे‡। उवाच च येन खलु महात्मना निरपेक्षं सर्वस्वमर्थिसात् कृतं कथं तेन तुच्छस्यार्थस्य कृते महापातकमिदमाचर्येत इति।

ततश्च चारुदत्तः पृष्टोऽधिकरणिकेन किमसौ पद्भ्यां गता, उत प्रवहणेनेति। अस्मिन्नन्तरे नगररक्षाधिकृतो वीरकः अधिकरणं प्रविष्टोऽधिकरणिकेन पृष्टः प्रवहणमधिकृत्य जल्पितवान् वसन्तसेना चारुदत्तस्य प्रवहणमारूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीतेति। एतेन शकारस्योक्तेरवष्टम्भनेनाधिकरणिकश्चारुदत्तस्य विशुद्धौ सन्दिहानः शकारस्योक्ते-

---

* अये असम्बद्धप्रलापिन्,

अभ्युन्नतोऽसि सलिलैर्न बलाहकानां चापाग्रपक्षसदृशं भृशमन्तराले।
मिथ्यैतदाननमिदं भवतस्तथाहि हेमन्तपद्ममिव निष्प्रभतामुपैति ॥१९॥

† तुलनं चाद्रिराजस्य समुद्रस्य च तारणम्।
ग्रहणं चानिलस्येव चारुदत्तस्य दूषणम्॥

‡ वेदार्थान् प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्राच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥२१॥

आर्यचारुदत्तः कथमकार्यं करिष्यति।

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं दत्तानि येन हि धनान्यनपेक्षितानि।
स श्रेयसां कथमिवैकनिधिर्महात्मा पापं करिष्यति धनार्थमनार्यजुष्टम् ॥२३॥

याथार्थ्यनिर्णयाय *पुष्पकरण्डकोद्यानं गत्वाऽचिरमेव द्रष्टव्यं तत्र काचिद्विपन्ना स्त्री वर्तते वा न वेति वीरकमादिष्टवान् । वीरकेणापि गत्वा प्रतिनिवृत्तेनोक्तम् —दृष्टं मया स्त्रीकलेवरं श्वापदैर्भक्ष्यमाणम् इति । कथं ज्ञायते स्त्रीकलेवरमिति पृष्टेन तेन सावशेषैः केशहस्तपाणिपादैरुपलक्षितं मयेत्युक्तम् । ततश्च अधिकरणिको दोलायमानमतिः† संवृत्तः, चारुदत्तोऽपि छिद्रेष्वनर्था बहुलीभवन्तीति‡ परिदेवयाञ्चक्रे । ततश्चाधिकरणिकेन, आर्य चारुदत्त सत्यमभिधीयताम् इति प्रचोदितश्चारुदत्तः प्राह—दुर्वृत्तेन मत्सरिणा यदेव वक्तव्यं तत्रैव प्रत्यय आधेयः, न खलु विचारः प्रवर्तनीय इति ।

दुष्टात्मा परगुणमत्सरी मनुष्यो
　　रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद् वदति मृषैव जातिदोषा-
　　त्तद् ग्राह्यं भवति न तद्विचारणीयम् ॥२७॥

अपि च

योऽहं लतां कुसुमितामपि पुष्पहेतो-
　　राकृष्य नैव कुसुमावचयं करोमि ।
सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
　　केशे प्रगृह्य रुदतीं प्रमदां निहन्मि ॥२८॥

---

* एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥

† यथा यथेदं निपुणं विचार्यते तथा तथा सङ्कटमेव दृश्यते ।
अहो सुसन्ना व्यवहारनीतयो मतिस्तु गौः पङ्कगतेव सीदति ॥२५॥

‡ यथैव पुष्पं प्रथमे विकासे
　　समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले
　　छिद्रेष्वनर्था बहुलीभवन्ति ॥

ततश्च पुनरपि पक्षपातदुष्टोऽसि इति शकारेणाधिक्षिप्तस्याधिकरणिकस्य निर्देशेन शोधनकेनापनीतं चारुदत्तस्याऽऽसनम् । परमिदानीमपि उच्चैरासनापहरणादेशात् समुद्विजमानोऽधिकरणिकः, शोधनकस्य कर्णे एवं क्रियतामिति कथितवान् ।

अत्रेदमवधातव्यम् । कामम् अधिकरणिकोऽयं कुशाग्रबुद्धिर्यथाशक्ति तथ्यावधारणायैव प्रयतते । सर्वेषामेव वचनानां प्रश्नप्रतिप्रश्नाक्षेपादिना तथ्यं निर्णेतुं प्रयस्यति । तथापि प्रथमत एव शकारस्य भीतिप्रदर्शनेन स्वादेशविपर्यासविधानं नितान्तत एव तस्यानुचितम् । ततश्च तस्यैव दुरात्मनो न मयेति पदद्वयेनास्य मनसि यः सन्देहोन्मेषः सञ्जातः तस्य निराकरणाय कतिचिद्दिनानि व्यवहारस्य रोधः कर्तव्य आसीत् । किञ्च वीरकमुखाद् दृष्टं मया स्त्रीशरीरं श्वापदैरवलुप्यमानमित्युपश्रुत्य तदानीमेव तस्य शरीरस्य विशेषतः परीक्षणमवश्यमेव कर्तव्यमासीत् । एतद्द्वितयं वर्जयित्वाऽधिकरणिककार्याणि सर्वथाऽनवद्यान्येव ।

ततश्चाधिकरणमण्डपं प्रविष्टेन चारुदत्तवयस्येन मैत्रेयेणोपलब्धवृत्तान्तेन शकारं ताडयितुकामेन शकारेण ताड्यमानेन शकारं विप्रतीपं ताडयता कक्षदेशादाभरणानि पातितानि । ततस्तानि गृहीत्वा समवलोक्य ससाध्वसं शकारेण 'वसन्तसेनाया आभरणानीमानि । एतेषामेव कृते हता सा वराकी दुरात्मनाऽनेने'त्युक्तम् । एतेन च स्वप्नेऽप्यसम्भावनीयेन व्यतिकरेणाधिकृताः सर्वेऽधोमुखाः स्थिताः । तथाच "किमिति भूतार्थो न निवेद्यते" इति विदूषकेणानुयुक्तश्चारुदत्तः प्राह—

दुर्बलं नृपतेश्चक्षुर्नैतत् तत्त्वं निरीक्षते ।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत ॥

अधिकरणिकेनापि गण्डस्योपरि स्फोटकमिमं दृष्ट्वोक्तम्—

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः ।
ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥ इति ।

ततश्च श्रेष्ठिकायस्थाभ्यामनुयुक्तया महानुभावया वसन्तसेनामात्राऽभिहितं

सदृश एष न पुनः स इति। शकारेण चोक्तम्—अक्षिभ्यां मन्त्रितं वाचा मूकितम् इति। यदा च पुनः पुनरनुबध्यमानयाऽपि वृद्धया न प्रतिपन्नं तदाऽधिकरणिकस्यापि मनसि कृतं सन्देहेन पदम्।* आर्यचारुदत्तेन पुनर्विस्पष्टमेव आभरणानीमानि अत्रभवत्या दुहितुरिति निर्दिष्टम्। तथा च 'आर्य चारुदत्त, सत्यमभिधीयताम्।

इदानीं सुकुमारेऽस्मिन्निःशङ्कं कर्कशाः कशाः।
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः॥'

इत्युक्तश्चारुदत्तः प्राह—

अपापानां कुले जाते मयि पापं न विद्यते।
यदि सम्भाव्यते पापमपापेन च किं मया॥

इति। ततश्च किमनेन वसन्तसेनाविरहितेन भारायमाणेन जीवितेनेति मनसि पर्यालोच्य जातनिर्वेदेन प्रतिपन्नकल्प एवापराधः केवलं न पारितमनेन वसन्तसेना व्यापादिता इति उच्चारयितुम्†। तत्र खलु तस्य निर्देशेन शकारेणैव पूरितम्। किमन्यद्वक्तव्यमिदानीम्। एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो धार्यताम् इति शकारेणाभ्यर्थितेनाधिकरणिकेन समादिष्टाश्चारुदत्तग्रहणाय राजपुरुषाः। वसन्तसेनामात्रा पुनश्चारुदत्तस्य स्वदुहितृमारकत्वेऽपि तस्य मोचनाय अभ्यर्थिता राजपुरुषाः। अहो औदार्यं च गुणग्राहित्वं च गणिकामातुः। अहो लोकचरितानभिज्ञत्वमधिकरणिकस्य। ततश्च सिद्धं समीहितमिति निष्क्रान्तः शकारः। ततश्चाधिकरणिकेन शोधनकमुखेन विज्ञापितो राजा—

---

* वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य।
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टम्॥३४॥

† मया खलु नृशंसेन लोकद्वयमजानता।
स्त्रीरत्नं च विशेषेण शेषमेषोऽभिधास्यति॥

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत् ।
राष्ट्रादस्माच्च निर्वास्यो विभवैरक्षतैः सह ॥

इति । एवं विज्ञापितेनापि राज्ञाऽविमृश्यकारिणा दुराग्रहग्रहिलान्तः-करणेन तान्येवाभरणानि गले बद्ध्वा सडिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भञ्जयत इत्यादिष्टम् । आदेशमिमं समाकर्ण्य राज्ञोऽविमृश्य-कारिता दूषिता चारुदत्तेन । विचिन्त्य च मन्त्रिणामेव दुर्मतिर्निन्दिता या खलु राजानं लोकविद्विष्टं विदधाति सहस्रशश्च निरपराधान् प्राणैर्मोचयति* । ततश्च 'वयस्य रोहसेनस्य योगक्षेमं वहस्व' इत्युक्त्वा विसर्जितो विदूषकः । ततश्चाधिकरणिकवचनेन समादिष्टाश्चाण्डालाश्चारुदत्तस्य निग्रहाय । तेन च निरपराधेन चारुदत्तेनोद्दीपितामर्षेणोक्तम्—

विषसलिलतुलाग्निप्रार्थिते मे विचारे
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य ।
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥

इति ।

(क्रमशः)

श्रीक्षितीशचन्द्रशर्मणः

———

* ईदृशे व्यवहाराग्नौ मन्त्रिभिः परिपातिताः ।
स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ।
ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः,
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥

प्रामाणिक्येव याज्ञिकी पशुहिंसा

[निबन्धकः-रा-मुत्तुकृष्णशास्त्री शिरोमणिः]

अयि भोः प्रियपाठकाः, जागरूका भवत शास्त्रैकनिर्णेयपशुहिंसा-प्रामाण्ये। आपातमधुरैरप्रकटितशास्त्रतत्त्वैः अनवगतपूर्वोत्तरतन्त्रन्याय-समुच्चारितैः अतिप्राक्तनवैदिकाचारदूरीकरणपरायणैः, *संस्कृतपत्रिकास्वपि दृश्यमानैः कैश्चिद्वाक्याभासैः समाकृष्टचित्ता न परित्यजत परमपावनवैदिकधर्म-श्रद्धाम्। अतीतमासनिर्गतसंस्कृतसाहित्यपरिषदि "अपि नाम याज्ञिकी पशुहिंसा प्रामाणिकी" इति पृष्ट्वा वस्तुतः स्वाभिमतार्थाननुकूलैरेव कैश्चित्प्र-माणैर्यज्ञीयपशुहिंसाया अप्रामाणिकतां केचित्प्रत्यपादयन्। लेखन्तं दृष्ट्वा न कस्यापि वैदिकवाक्यार्थविचारकुतुकस्य मनो न चित्रीयते, यतो न कुत्रापि शास्त्रे पण्डितमण्डलविवादे वा ईदृशो पूर्वपक्षस्यापि रीतिर्दृष्टचरी श्रुतचरी च। यानि प्रमाणानि प्राधान्येन सिद्धान्तिभिरवलम्ब्यन्ते, कथं-चित्काञ्चिदन्यादृशीं गतिं तेषां प्रकल्प्य स्वाभिमतानि प्रमाणान्युपन्यस्यन्ति पूर्वपक्षिण इत्यस्तिस्थितिः॥

वेदार्थाभिज्ञम्मन्यैस्तु कैश्चिद्वादिभिः वैधी हिंसा प्रामाणिकीति वदतां वेद-तात्पर्यान्वेषणकुशलानां प्रमाणजातेषु नान्यतममप्यन्यथीकृतमित्यहो, कीदृशं कौशलं वेदार्थनिर्णये। युक्त्याभासैकविजृम्भितानीदृशान् वादान् नैव लक्षी-कुर्युरभिज्ञाः, नतरां च तत्खण्डनाय प्रवर्तेरन्। तथापि उत्तरेऽदत्ते अप्रति-षिद्धमनुमतं भवतीति न्यायेन परेषामेव मतं श्लाघीय इति तदीययुक्त्याभास-मोहितचित्ताः सम्यगनिर्धारितशास्त्रतात्पर्याश्च केचित्प्रियपाठका भ्राम्येयुरि-त्युत्तरदानाय यत्यते।

तत्रादौ यज्ञे पश्वादिप्राणिहिंसाविधायकानि कानिचित्तत्र तत्र श्रुतिस्मृती-

* अत्र नो वक्तव्यं प्रबन्धान्ते द्रष्टव्यम्। सं० सा० प० स०

तिहासपुराणसूत्रादिष्वनायासेनोपलभ्यमानानि प्रमाणानि प्रेक्षकाणां संदेह-निवृत्तये पुरस्कुर्मः ।

"अग्नीषोमीयं पशुमालभेत," "सप्तदशप्राजापत्यान् पशूनालभेत," "कपिञ्जलानालभेत" इत्यादिश्रुतिगतविधयः ।

"प्राणात्यये तथा श्राद्धे प्रोक्षिते द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्य खादन्मांसं न दोषभाक् ॥"

(याज्ञवल्क्यस्मृतिः)

"यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः,"
"यथाविधि नियुक्तस्तु यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥"
"नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् ।
उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः ॥
पशूनां त्रिशतं तत्र यूपेषु नियतं तदा ।
अश्वरत्नोत्तमं तस्य राज्ञो दशरथस्य च ॥
कौसल्या तं हयं तत्र परिचर्य समन्ततः ।
कृपाणैर्विशशासैनं त्रिभिः सा परया मुदा ॥"

(रामायणम् बाल० ४-३३)

"नात्मार्थं पाचयेदन्नं न वृथा घातयेत्पशून् ।
प्राणी वा यदि वाऽप्राणी संस्कारं यजुषाऽर्हति ॥"

(मोक्षधर्म-२४६ ५)

"अशुद्धमिति चेन्न शब्दात् ।" (ब्रह्मसूत्रे तृतीयोऽध्यायः)

किमेतान्यतिस्फुटानि प्रमाणवचनानि दुराग्रहपिशाचिकाविष्टचेतसां परेषां दृष्टिपथं नारोहन्ति ? आरोहन्ति वा साधुसंप्रदायानवगतदुरूहशास्त्रमर्यादानां न यथावदर्थप्रत्ययमुपजनयन्ति, उपजनयन्ति वा सनातनधर्मस्तम्भोन्मूलन-कुठारैः परप्रतारणैकपरायणैः कथंचिदाच्छादितानि वेति न ज्ञायते । यदि वस्तुत एते उत्सर्गापवादन्यायतत्त्वावगमेनाध्वरपशुहिंसाप्रामाण्ये विप्रति-

पद्यन्ते, ततोऽवलम्बन्तां भगवतो वासुदेवस्य निश्चितं मतं निखिलाम्नाय-सारभूतासु भगवद्गीतासु प्रकटीकृतम्। तत्र हि आदौ

"त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे॥"

इति पक्षद्वयमुपन्यस्यानन्तरम्—

"यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि तु कर्माणि संगन्त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥"

इत्युक्तम्। तस्मात् यज्ञीयपशुहिंसा प्रामाणिकीति मातृसहस्तेभ्योऽपि हिततमया भगवत्या श्रुत्या प्रतिपादिते कुतः कुदृष्टिवादस्य प्रसरः, इति नेतः परं किमपि प्रमाणमुपन्यसनीयं मन्ये।

अथ विधिनिषेधा एव 'इदं कर्तव्यम्' 'इदं न कर्तव्यम्' इति बोधयन्ति। मन्त्रार्थवादादयः पुनः केवलं स्मारयन्तः, स्तुवन्तश्चान्यत्र विहितं कर्म न स्वातन्त्र्येण कञ्चिदर्थं विदधति, निषेधन्ति वेति, मीमांसकघण्टाघोषमविगणय्याविज्ञाय वा स्वाभिलषितसाधनाय परैरुदाहृतानि वचनानि, परामृशामः। यावद्यावद्विचारपथं नीयन्ते तावत्तावत्सिकताकूपानीव तानि शतशो विशीर्यन्ते। विदितवेदितव्याः सनातनधर्मप्रणयिनः पण्डिताः, पश्यत परैरुदाहृतान्मन्त्रान्समालोचयत च तदर्थान् कियदेते तदीयपक्षमुपोद्बलयन्तीति। दर्शपूर्णमासयोः वत्सापाकरणाय सचिह्नां शाखां प्रार्थयते, "यजमानस्य पशून्पाहीति"ति। किमिदं प्रार्थनं विधिविहितां पशुहिंसां निषेधति? ओमिति चेत् कथमिति त एवोपपादयन्तु। न हि धनं पाहीत्युक्ते भोजनादिकमपि मा कुर्वित्यर्थः प्रतीयते, परं त्ववश्यानपेक्षितं व्ययं मा कुरु, चोरादिभ्यः पालय, इत्यादिरर्थो गम्यते। तथा पशून पाहीत्युक्त यदर्थं पशवस्सृष्टास्तस्मादपि यागादितो रक्षेति नार्थः, किंतु वृथा पशुघातकेभ्यो निषादादिभ्यो रोगादिभ्यश्च रक्षेत्येव तदर्थः। "यज्ञार्थं पशवस्सृष्टा" इति च स्मृतिः।

तथा "स्वधिते मैनं हिंसीः" इत्येदपि न तत्पक्षानुकूलम्। दीक्षितस्य वपनकाले, अध्वर्युः स्वधितिं प्रार्थयते, "स्वधिते मैनम्" इत्यादिना। अस्य चार्थमेवमुपवर्णयन्ति भट्टभास्कराः—'हे स्वधिते, क्षुर एनं यजमानं मा हिंसीः, हिंसाप्रतिषेधो वप्तुरप्रमादाय" इति। नापितस्याप्रमादबोधनाय प्रवृत्तमिमं मन्त्रं पशुहिंसानिषेधपरमिति मुक्तशङ्कं भाषमाणानां कीदृशः प्रज्ञाविलोपः? पशुं त्रायेथामित्यपरमपि वचनं तैरुदाहृतं तत्पक्षसाधनाय। तदपि भाष्ये एवमवतारितं "स्वधितिं स्वरुंच जुह्वामङ्क्त्वा ताभ्यां पशुं समनक्ति" इति। त्रायेथां समञ्जनेन रक्षतेत्यर्थः। "शमसद्विपदे" इत्याद्यपराऽपि तैरुदाहृता ऋक् केवलं रुद्रप्रार्थनारूपा न विधिविहितां हिंसां दूषयितुमलम्। एवं तैरुदाहृतानि सर्वाण्यपि वेदवाक्यान्यविचारितरमणीयानि केवलं बालानां मोहनाय, न पण्डितानाम्। अत एव तैर्मन्त्राणामादिममन्तिमं मध्यमं वा भागं स्वपक्षानुकूलमित्युदाहरन्तोऽपि भ्रान्त्या अर्थाभिधाने मूकीभवन्ति।

मान्याः! पश्यतान्यस्मिन्नपि यजुर्मन्त्रे एतेषां दृढतमं मोहम्, "इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु", इति। अयं हि मन्त्रः अश्वशिरस उपस्थाने विनियुज्यते। अस्यायमर्थः। इममेकशफं पशुं—अश्वमिति यावत, मा हिंसीः—हे अग्ने? ज्वालया मा दह त्वदीयज्वालया व्यथां विनैवाश्वं परलोकं प्रापयेति भावः। अयमपि मन्त्रः अश्वहिंसा न प्रामाणिकीत्यत्रोदाह्रियमाणः "शब्दो नित्यः कृतकत्वात", इत्यनुमानप्रयोग इव सुष्ठु शोभते। 'इमामूर्णायुमिति' मन्त्रोऽपि वृष्णिशिरस उपस्थाने विनियुक्तः स्वपक्षसाधनायोदाहृतः! 'तदिदमन्यत्राहितमन्यत्र निपतितमकुशलस्येव धन्विनः शरनिक्षुरुस्त्वम्"।

एव 'मघ्न्या इति गवां नामे"ति मोक्षधर्मपर्वस्थं श्लोकं किञ्चिद्वैपरीत्येनोदाहरन्तो यत्किञ्चिदसंबद्धं भाषन्ते। तत्र चास्य श्लोकस्योत्तरार्धमेवं दृश्यते 'महच्चकाराकुशलं वृथायोगां निहन्ति हि" इति अत्र वृथापददर्शनाद् यः कामाल्लोभाद्वा गां निहन्ति स एव निन्द्यते, न यज्ञपशुहन्ता श्रोत्रिय इति स्पष्टं ज्ञायते। भवतु वा तदभिमतमेवोत्तरार्ध कस्मिंश्चित्कोशे, किं नश्छिन्न-

मेतावता ? तथाहि 'न हिंस्यात्सर्वा भूतानी" ति श्रौतमिव वाक्यमिदमपि सामान्यप्राप्तपशुहिंसानिषेधकमेव भवेत्, न विशिष्य विधिविहितपशुहिंसा-निषेधकमपि। अनयैव दिशा "किं ते कृण्वन्ति कीकटेषु गावः' इति वैदिक-मन्त्रः, "ज्ञानाति को वेदपुराणतत्व' मिति पद्मपुराणश्लोकः 'सर्वकर्मस्वहिंसा हि धर्मात्मा मनुरब्रवीत्। कामचारा हि हिंसन्ति बहिर्वेद्यां पशून नराः" इति मोक्षधर्मपर्वस्थश्लोकश्च तदभिमतसाधनत्वेनाभिमन्यमाना दूरतः प्रक्षेपणीयास्साधुभिः। मोक्षधर्मश्लोकस्थं बहिर्वेद्यामित्येकमेव पदं परेषां मुखपिधानायालम्। एवमेव "यदि यज्ञांश्च वृक्षांश्चे" त्यत्र वृथापददर्शनादवैध-पशुहिंसानिन्दापरमिति विबुधा विजानन्तु।

"भो भोः प्रजापते राजन पशून् पश्य वृथाऽध्वरे" इत्यादिभागवत-श्लोका अपि वाक्यतात्पर्यनिर्णयैकसाधनपूर्वतन्त्रवासनाशून्यान्तःकरणैरेव कैश्चित् पण्डितंमन्यैर्यज्ञीयपशुहिंसानिषेधपरा इत्यभिमन्येरन्न शास्त्रार्थाभिज्ञैः पण्डितैः। पूर्वतन्त्रे हि यत्र बहुभिर्वाक्यैरेकस्य वाक्यस्य निरोधस्तत्र बह्वनु-रोधेनैकं नेतव्यम्, नैकानुरोधेन बहूनीति निर्णीतं "भूयसां स्यात्सधर्मत्व" मित्यत्र। तथाच यदि सकलश्रुतिस्मृतिवाक्यवृन्दैर्वस्तुत इमे श्लोका विरुन्धन्ति तदा यज्ञीयपशुहिंसाप्रमाणभूतवचसां बहुत्वादिम एवान्यथा नेया इति शास्त्र-मर्यादा। वस्तुतस्तु प्रकरणादिपरामर्शे क्रियमाणे नाल्पीयानपि विरोधः परिस्फुरति। तथाहि—अत्र कश्चिद्राजा बहुकालानुष्ठितवैदिककर्मापनीत-कल्मषः परश्रेयः अन्वेषमाणः कञ्चिद्योगिवरं पृच्छति।

"न जानामि महाभाग परं कर्मापविद्धधीः।
ब्रूहि मे विमलं ज्ञानं येन मुच्येत कर्मभिः"

इति। सोऽपि मुनिवरः क्षीणकल्मषोऽसौ योग्यस्तत्त्वज्ञानोपदेशायेति ज्ञात्वा कर्मफलेषु वैराग्यं तस्योत्पादयितुं कर्माणि निन्दति—"भो भोः प्रजा-पते राजन्नि"त्यादिना। अतोऽस्य वैराग्योत्पादन एव तात्पर्यं, न कर्मनिन्दा-यामपीति विभावनीयम्। उक्तं च शास्त्रतात्पर्यविद्भिः शबरस्वामिभिः "नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता अपि तु स्तुत्यं स्तोतुम्" इति। दृश्यन्ते च

परःशतं वाक्यान्येवंरूपाणि श्रुतिषु स्मृतिषु काव्येषु च। "असन्तं वा एतद्यदच्छन्दोमम्" अश्रुजं हि रजतं यो बर्हिषि ददाति पुराऽस्य सम्वत्सराद्गृहे रुदन्ती"ति श्रुतिः।

आपस्तम्बादिमहर्षयोऽपि वेदविहितकर्मसु प्रवृत्तिसिध्यर्थमत्युत्तमामपि ब्रह्मसंस्थां बहुधा निन्दन्ति। नैतावता वस्तुतस्तन्निन्दायामेव तेषां तात्पर्यमिति कश्चिद्मूढः कल्पयेत्। तदाहुश्चतुरधिकशतप्रबन्धनिर्मातारस्सर्वतन्त्रस्वतन्त्रा मीमांसकमूर्धन्याश्च श्रीमदप्पय्यदीक्षिताः स्वकीये मध्वतन्त्रमुखमर्दनाख्ये कस्मिंश्चित् प्रकरणग्रन्थे—

"स्फारा तत्तत्पुराणागमवचनशतप्रापितायान्यनिन्दा,
तत्तद्भक्त्यादिसिद्धैस्तवनविरचने सा भवेद् द्वारमात्रम्।
कर्मानुष्ठापनार्थं किमु निरतिशयां ब्रह्मसंस्थादिनिन्दा-
मापस्तम्बादिवाक्ये न कलयसि ततः काऽस्य हानिस्तवेष्टा"

इति। एवं च प्रकृते वैराग्यसंपत्तये कर्मनिन्देति न किञ्चिदेतत्।

किंचानाघ्रातवेदगन्धा अपि निश्शंकमनादिपरंपरागतवेदानुपूर्वीमन्यथयन्तीत्यहो कीदृशी कालस्य कुटिलता। अन्तकाय गोधातमिति स्वकपोलकल्पितमेव किञ्चिद्वाक्यमुदाहृत्य, "तथाचोक्तं यजुषी"ति प्रलपन्ति। तैत्तिरीयब्राह्मणे तृतीयकाण्डे चतुर्थप्रपाठके "अन्तकाय श्वनित-' मित्येव दृश्यते न त्वन्तकाय गोधातमिति। नोपलभ्यते कुत्रापि वेदभागे तादृशमेकं वाक्यमिति नेदं तिरोहितमधीतयजुःशाखिनां विदुषाम्। परं दृश्यते निर्ऋत्यै गोधातमिति पूर्वोक्त एव प्रपाठके। तदेवं पूर्वोत्तरसंन्दर्भज्ञानशून्यैः यथावदर्थानभिज्ञैश्च तैः परमपावनश्रोत्रियाणामधिक्षेपाय केवलमन्यथीकृतमिति भाति। अथवा श्रूयतां कुत्रापि वेदभागे "अन्तकाय गोधातमिति" तथापि तेषां समीहितं न सिद्ध्येत्, गोधातपदेन वैधपशुमारक एव श्रोत्रियो गृह्यते, इत्यत्र प्रमाणानुपलम्भात्। "निर्ऋत्यै गोधातमि"त्यस्य तात्त्विकार्थस्तु—पापदेवतायै विषकण्टकादिभिर्गवां मारयितारमालभेतेति। सर्वोऽप्ययं प्रपाठकः पुरुषमेधविधायक इत्याहुर्भाष्यकाराः,—

"प्रपाठके चतुर्थे तु मेधः पुरुषपूर्वकः ।
उच्यते सूत्रकारेण सविस्पष्टमुदाहृतः ॥"

इत्याद्युपोद्घाते । एतत्प्रपाठकान्तर्गतमिदं वाक्य यज्ञीयप्राणिहिंसानिषेधायोदाहरद्भिरन्यदेवोपक्रान्तमन्यदेवोपसंहृतमिति नैते सर्वथा विस्रम्भणीयवाचो विदुषाम् ।

यदप्यजाश्वादिशब्दानां सकलश्रुतिस्मृतिप्रसिद्धार्थं हित्वा तदुदाहृतप्रमाणवचसामपि तात्पर्यमजानद्भिः किमप्यभ्यधायि, न तद्विशिष्योत्तरदानार्हमिति केवलं काश्चन श्रुतीरुदाहरिष्यामः । कथमिव तास्तस्मिन्पक्षे समाधीयमाने उपपद्येरन्निति विपश्चिदपश्चिमा एव विभावयन्तु ।

"पशुं विशास्ति" "लोहितं निरस्यति" "शकृत्संप्रविध्यति" "वपामुद्धरति" इति श्रुतिः । बीजैर्यागे क्रियमाणेऽग्नीषोमीयप्रकरणस्थानीमानि वाक्यानि कथं नाम नोपरुध्येरन । किंच "सूर्यं चक्षुर्गमयतात्" "वातं प्राणमन्ववसृजतात्" "दिशः श्रोत्रम्" "अन्तरिक्षमसुं" इत्यादि पशुयागप्रकरणस्था अपराश्च श्रुतयः कथं नाम सामञ्जस्यमश्नुवीरन । सर्वमिदं गोमेधप्रकरणेऽप्यतिदेशेन प्राप्नुवद्गोशब्दस्य शब्द इत्यर्थाङ्गीकारे सुतरां बाध्येत । अश्वमेधप्रकरणे च "तार्येणाश्वं संज्ञपयन्ति । यज्ञो वै तार्यम् । यज्ञेनैवैनं समर्धयन्ति । यामेन साम्ना प्रस्तोतानूपतिष्ठते । यमलोकमेवैनं गमयति ।" इति श्रूयते । तत्र "तार्यमिति घृताक्तस्य कम्बलस्य नामधेयम् । तेन संज्ञपयन्ति मारयन्ति" इत्यादि भाष्ये व्याख्यानम् । अश्वशब्दो यदि ज्ञानवाची तदा कथं तार्येण संज्ञपनम्, कथं च यमलोकप्राप्तिरित्यादि स्पष्टं निरूपणीयं परैः । ईदृशार्थाङ्गीकारे चानुपपद्यमानानां श्रुतीनां दिङ्मात्रमत्रोदाहृतम् । पर्यालोच्यमाने प्रायेण सर्वाण्यपि वेदवाक्यानि न संघटेरन्नित्यलम् ।

अन्ते उदाहृताया ब्राह्मणकथायाः 'अग्निः पशुरासी'दित्याद्यथर्वशिरोवचनस्य च, तन्मतानुकूल्यमस्मत्पक्षप्रातिकूल्यं च कथमिति त एवोपपादयन्त्विति नात्र किञ्चित्प्रस्तूयते । अवशिष्टानामपि द्वित्राणां प्रमाणानामुत्तरदानं पिष्टपेषणन्यायमावहेदित्युपेक्ष्यते ।

२

एतावता सत्यपि हिंसात्वे यज्ञीयपशुहिंसा न दोषावहेति सयुक्तिकं प्रादर्शि। परं तु "अशुद्धमिति चेन्न शब्दात्" इत्येतत्सूत्रस्थभगवद्रामानुजाचार्यभाष्य-पर्यालोचने सा हिंसैव न भवतीति ज्ञायते। एकैकेनापि सनातनधर्मप्रणयिना समयेऽस्मिन्नवश्यमिदमवलोकनीयमिति तद्भाष्यं तथैवात्र लिख्यते।

"शब्दात्—अग्नीषोमीयादेस्संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वा-भावशब्दात्। पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति "हिरण्यशरीर ऊर्ध्वं स्वर्गं लोकमेति" इत्यादिकम्। अतिशयिताभ्युदयसाध-नीभूतव्यापारः अल्पदुःखदोऽपि न हिंसा, प्रत्युत रक्षणमेव। तथाच श्रुतिः 'न वा उ वैतन्म्रियसे न रिष्यसि। देवान् इदेषि पथिभिः सुगेभिः। यत्र यन्ति सुकृतो नापि दुष्कृतः। तत्र त्वा देवः सविता दधातु' इति। चिकित्सकं च तादात्विकाल्पदुःखकारणमपि रक्षकमेव वदन्ति। पूजयन्ति तज्ज्ञाः" इति। शान्तिपर्वण्यपि ग्राम्यानारण्यांश्च पशून् परिगणय्यान्तेऽभिहितम् "यज्ञेषूपा-कृतं विश्वं प्राहुरुत्तमसंशितम्। एतस्य चाभ्यनुज्ञातं पूर्वैः पूर्वतरैस्तथा" इति।

सर्वथा कुमतीनामुत्तानदृशां च दुर्वादा दूरीकरणीया विद्वद्भिरिति प्राथ्यते।

इति शिवम्

[संस्कृतपत्रिकास्वपि पशुविशसनप्रतिषेधकाः प्रबन्धाः प्रकाश्यन्त इति दुःखायन्ते लेखकमहाभागाः। कारणं पुनर्वयं न विद्मः। अपि न ज्ञायते महाभागैरमीभिर्यन्निरुक्तादिष्वपि वेदस्यार्थशून्यत्वं सयुक्तिकमुपपाद्य प्रमाणोपन्यासपुरःसरं निराकृतम्। अत एवोक्तमस्माभिः पूर्वपक्षरूपेणै-वायं प्रबन्धः संमुद्र्यते। न खलु प्रबन्धुः पूर्वपक्षत्वे तात्पर्यम्। तेन हि दृढतरसिद्धान्तरूपेणैव विरचितो मूलप्रबन्धः। अस्माभिरेव पितृपिता-महादिक्षुण्णे पथि वर्तमानैः शब्दप्रमाणकैस्तस्य पूर्वपक्षत्वं परिकल्पितम् इति। सम्पादकः]।

तूर्णं यदि न गच्छेम स्थानं नैव लभेमहि ।
रणसन्नद्धमालोक्य युवराजं सुखं भवेत् ॥११॥
सगर्वमाहुरेके च किं प्राचीरसमाश्रयैः ।
युवराजो मुहूर्त्तेन हन्ता रामं सहानुजम् ॥१२॥
सहेत कः शरांस्तस्य वह्निः शुष्कतृणं यथा ।
तथा दहेद् विपक्षान् स रावणिः शत्रुमर्दनः ॥१३॥
विभीषणं पराजित्य बद्ध्वा चानेष्यते सभाम् ।
नृपप्रसादभिक्षुन्तं गच्छताशु सदस्तलम् ॥१४॥ (विशेषकम्)
दृष्ट्वा श्रुत्वा च विविधं हसन् मनसि निर्भयः ।
विभीषणेन सौमित्रिराससाद निकुम्भिलाम् ॥१५॥
कुशासनं समध्यास्य विविक्ते कौषिकांशुकः ।
इन्द्रजिद् यजते यत्र देवमिष्टं स्रजाऽन्वितः ॥१६॥
हसन्त्यां दह्यते धूपो घृतगन्धिः समन्ततः ।
दीपा ज्वलन्ति पुष्पाणि भान्ति सौवर्णभाजने ॥१७॥
खड्गिखड्गकृतः कोषः कोषी च परिपूरितौ ।
तत्राऽऽस्तां जाह्नवीतोयैः सर्वपापप्रणाशकैः ॥१८॥
हैमघण्टा स्थिता पार्श्वे विचित्रा स्वर्णभाजने ।
उपहारा विराजन्ते भक्त्यानीता इतस्ततः ॥१९॥
रुद्धद्वारि गृहे चास्त एकाकी स तपोरतः ।
रथीन्द्रः शिवसङ्काशः कैलासगिरिशीर्षके ॥२०॥
क्षुधातुर इव व्याघ्रो गोष्ठगेहं महाभुजः ।
लक्ष्मणः प्राविशन्मायाप्रभावेणेष्टिमन्दिरम् ॥२१॥
कोषे दध्वान निस्त्रिंशो बाणस्तूणीरपट्टके ।
चङ्कम्प्यते स्म मन्दिरं वीरपादभरार्दितम् ॥२२॥
निमील्योन्मील्य नेत्रे स ऐक्षिष्ट चकितं पुरः ।
रावणिस्तिग्मकिरणं मध्याह्न इव भास्करम् ॥२३॥

अष्टाङ्गया प्रणमन वीरो बद्धाञ्जलिपुटस्तथा ।
प्रोवाचायष्ट वह्ने त्वामद्य दासः शुभक्षणे ॥२४॥
तेन लङ्का विविक्तासीत्त्वत्पवित्रपदार्पणात् ।
किन्तु ब्रूहि कथं प्रागा मर्त्यलक्ष्मणरूपधृक् ॥२५॥
यदीह त्वं प्रसन्नोऽसि दासे लीलामय प्रभो ।
कोऽयं विलास इत्युक्त्वाऽनमन्नमितमस्तकम् ॥२६॥
नाहं विभावसुर्भद्र लक्ष्मणोऽहं रघूद्भवः ।
एवं प्रत्यब्रवीद्दर्पाद् वीरो दशरथात्मजः ॥२७॥
हन्तुं त्वां वीरशार्दूल गतिर्मे तव सन्निधौ ।
देहि युद्धं मया वीर कालं मा क्षिप रावणे ॥२८॥
निरीक्ष्य बलिनं वीरो लक्ष्मणं सहसा पथि ।
दृष्टसर्पो यथा भीतस्तथा भीतिवशं गतः ॥२९॥
हन्त पिण्डोऽगलत्तापात्तमोऽग्रसत भास्करम् ।
निदाघः शोषयामास सिन्धुं कलिरगान्नलम् ॥३०॥
प्राह सविस्मयं वीरस्तथ्यं तदाह यद्भवान् ।
ब्रवीतुच्छद्मना केन प्राविशद्राक्षसीं पुरीम् ॥३१॥
शतानि राक्षसाः शक्त्या यक्षराजभयङ्कराः ।
भीमास्त्रपाणयः सर्वे शश्वद्रक्षन्ति गोपुरम् ॥३२॥
प्राचीरमूर्ध्नि सूत्तुङ्गे चक्राकारेण सर्वतः ।
भ्रमन्त्ययुतयोद्धारः कथन्तान भ्रान्तिमानयत् ॥३३॥
देवानां मानवानाञ्च विश्वेऽस्मिन् कोऽस्ति यो रणे ।
विमुखयेत् क्षपाटानां वृन्दं साक्षाद् यमोपमम् ॥३४॥
कथं प्रवञ्चयते देव दासोऽयं भवता नतः ।
सर्वभुक् कौतुकं किन्ते प्रियकौतुकमूर्द्धग ॥३५॥
निराकृतिरसौ देव लक्ष्मणो न भवेन्नरः ।
मन्दिरं प्राविशत् पश्य यदद्यापि समावृतम् ॥३६॥

वरं देहि प्रभो लङ्कां निःशङ्कां करवाण्यहम् ।
हत्वा राघवमद्यैव किष्किन्ध्येशं हनान्यहम् ॥३७॥
बद्ध्वा विभीषणं राजद्रोहिणं कुलकज्जलम् ।
दास्ये राजपदे दुष्टं शृणु शृङ्गमहाध्वनिम् ॥३८॥
विलम्बिते मयि रक्षःसैन्याः स्युर्भग्नचेष्टिताः ।
अनुमन्यस्व मां क्षिप्रं विधास्ये गमनं युधे ॥३९॥
देवाकृतिः प्रतिप्राह लक्ष्मणोऽहं तवान्तकः ।
गतायुषं कृतविलः किं न वेत्सि दशत्यहिः ॥४०॥
मदोन्मत्तो बली दैवाद्देवान् मूढावमन्यसे ।
एभिर्दिनैर्नश्यसि त्वमाहवे देवनोदितः ॥४१॥
उक्तैतावद् बली कोषाद् मुमोचासिं यमाकृतिम् ।
शुशुभे स वज्रकल्प आग्नेयः शत्रुदोषणि ॥४२॥
रावणिराह सत्यश्चेत् सौमित्रिस्त्वं महाभुज ।
रणस्पृहां महायुद्धे नूनं ते शमयाम्यहम् ॥४३॥
विरतो जातु संग्रामान्मेघनादः श्रुतस्त्वया ।
आतिथ्यं पूर्वमादत्स्व वीर मदतिथीश्वरात् ॥४४॥
रक्षोऽरिरपि वीरेन्द्र पूजनीयोऽतिथिर्मम ।
आयुधानि ग्रहीष्येऽहं प्रतीक्षस्व सदग्रणीः ॥४५॥
न हन्यात् कोऽपि निःशस्त्रमेषा वीरत्वपद्धतिः ।
नूनं ते विदिता क्षत्र किमन्यद् व्याहरामि ते ॥४६॥
मेघमन्द्रं प्रत्युवाच लक्ष्मणस्त्वां निहन्म्यहम् ।
किं मन्द मुञ्चति व्याघ्रं मृगाविज्जालसंयतम् ॥४७॥
रक्षोऽन्वयप्रसूतिस्त्वं केनाद्य रक्षितो भवेः ।
विद्धि क्षात्रविधिं जाल्म शत्रुर्वध्यो यतः कुतः ॥४८॥
अभिमन्युर्यथा दृष्टसप्तशूरस्तथेन्द्रजित ।
तप्तायःपिण्डसङ्काशो रोषाद्वागवज्रमक्षिपत ॥४९॥

धिक् क्षत्रियकुलग्लानिं लक्ष्मणं त्वामपत्रपम् ।
पापं नाम तव श्रुत्वा रोतुस्यन्ति क्षत्रियाः श्रुतीः ॥५०॥
वेश्मंतश्चौरवत् प्राप्तं त्वां निरस्यामि साम्प्रतम् ।
तार्क्ष्यनीडं प्रविष्टः किं निर्गच्छेद् भुजगस्ततः ॥५१॥
निमेषात् कोषमुद्यम्य भीमबाहुर्जघान सः ।
बलाच् शिरसि सौमित्रेः सद्यः स न्यपतद् भुवि ॥५२॥
घोरं दध्वान दिव्यास्त्रं चकम्पे देवमन्दिरम् ।
भूकम्पादिव सुस्राव रक्तधारा सहस्रशः ॥५३॥
मेघनादोऽदधाद्दिव्यखड्गमुद्यन्तुमक्षमः ।
भूत्वाचकर्ष चापञ्च दोष्ण्यस्थाल्लक्ष्मणस्य तत् ॥५४॥
चर्माचकर्ष कोपात् स वैकल्यं तद् गतं बलम् ।
तथाकर्षद् वृथा तूणं शृङ्गमद्रेर्यथा करी ॥५५॥
एवं वीरगणापीडो मेघनादो हतोद्यमः ।
जातो मायाप्रभावेण दुर्बोधेन बलीयसा ॥५६॥
धावमानं प्रतिद्वारं मान्यदर्शत् सुविस्मितः ।
शूलपाणिमग्निकल्पं पितृव्यं रणभैरवम् ॥५७॥
विषण्णः प्राह वीरेन्द्रस्तथ्यं बुद्धं मयाऽधुना ।
कथं लक्ष्मण आगच्छद् रक्षोरक्षिवृतं पुरम् ॥५८॥
हन्त तातोचितं किन्ते कार्यं रावणसोदर ।
निकषागर्भजातस्य कुम्भकर्णानुजस्य वा ॥५९॥
प्रदर्शयसि पन्थानं चौरं स्ववेश्मनः कथम् ।
अध्यासयसि चण्डालं नृपासनमनुत्तमम् ॥६०॥
ममानिन्द्यो गुरुस्त्वं हि मुञ्च द्वारं व्रजाम्यहम् ।
अस्त्रागारं निहत्याद्य लक्ष्मणं कीर्त्तिमश्नवै ॥६१॥
विभीषणः प्रतिप्राह प्रार्थनेयं वृथैव ते ।
रामदासोऽस्म्यहं केन करिष्यामि विपक्षताम् ॥६२॥

रावणिः कातरः प्राह पितृव्य कथमब्रवीः ।
रामदास इदं वाक्यं श्रुत्वा लज्जाहतोऽस्म्यहम् ॥६३॥
शम्भुभाले विधात्रेन्दुः स्थापितः किं भुवस्तले ।
पतितः स रजोराशौ दृश्यते लुठितो जनैः ॥६४॥
रक्षोरथिन् कथं भ्रान्तं क्व ते जन्म महाकुले ।
को वा रामोऽधमो मर्त्यो न बुध्येय किमप्यहम् ॥६५॥
राजहंसोऽमलवारिविहारी पद्मकानने ।
किं चरेत् पङ्किलापेषु शैवालदलधामसु ॥६६॥
उपतिष्ठेत किं सिंहः शृगालं वीरकेशरिन् ।
दासोऽयमज्ञ इत्येतत सर्वं ते विदितं सुधीः ॥६७॥
लक्ष्मणोऽयं लघुचेता नो चेद्वीर कथं वा माम् ।
आह्वयेत निरस्त्रं भो इदं किं वीरलक्षणम् ॥६८॥
लङ्कायां शिशवः श्रुत्वा हसिष्यन्ति न किं गुरो ।
मुञ्च वर्त्म निरीक्षेऽहं सौमित्रेर्विक्रमावधिम् ॥६९॥
स्वचक्षुर्भ्यामपश्यस्त्वं वीर्यं दासस्य संयुगे ।
देवदैत्यनरैः सार्द्धं कुतस्त्रस्यामि भिक्षुतः ॥७०॥
निकुम्भिलां प्रविवेश दम्भी धाष्टर्येन पामरः ।
रिपुं शास्म्यनुजानीहि दासं त्वच्चरणार्चकम् ॥७१॥
अहो धातर्दुष्टदैत्यो वनं भ्रमति नन्दनम् ।
कीटदष्टं प्रफुल्लाब्जमवमानं कथं सहे ॥७२॥
म्लानवक्त्रो ह्रिया वीरो मन्त्रानतफणः फणी ।
यथालक्ष्य कुमारं स प्रत्युवाच सयुक्तिकम् ॥७३॥
वत्साहं दोषमुक्तोऽस्मि धिक् करोषि वृथैव माम् ।
स्वकर्मदोषदहनैर्लङ्कां दहति ते पिता ॥७४॥
द्रुह्यन्ति पापिने देवा लङ्कैषा पापपूरिता ।
भूर्मज्जति कालतोये कल्पान्तसमये यथा ॥७५॥

तेनाहं राघवपदं शरणं कृतवाञ्छुभम् ।
परपापेन कस्तात जगत्यस्मिन् निनङ्क्षति ॥७६॥
रुरोष वासवत्रासो निशीथेऽम्बुदसन्निभः ।
प्रत्यवादीच्च गम्भीरं वज्रनिर्घोषभीषणम् ॥७७॥
रक्षोराजानुज ख्यातो भुवि त्वं धर्मसेवकः ।
ब्रूहि तात कथं ज्येष्ठं कुलं ज्ञातींस्तथाऽत्यजः ॥७८॥
परश्चेत् सगुणस्तात स्वजनो यदि निर्गुणः ।
सर्वथा स्वजनः श्लाघ्यो निर्गुणोऽपि परः परः ॥७९॥
शास्त्रस्थितिरियं लोके लङ्घिताऽभूत् कथं त्वया ।
यद् वा नीचसहचरो नीचत्वमेव गच्छति ॥८०॥
इतश्चैतन्यमासाद्य सौमित्रिर्मायायाहतः ।
समाकृष्य धनुर्वीरो विव्याधेन्द्रजितं शरैः ॥८१॥
असृग्धारोक्षितं वक्षः शोणितार्द्रा च मेदिनी ।
बभूवास्य तथा देहः सपत्राकृत आशुगैः ॥८२॥
शङ्खघण्टादिकं यज्ञपात्राणि च रुषान्वितः ।
वीरश्चिक्षेप सर्वाणि हन्तुं तमाततायिनम् ॥८३॥
अभिमन्युं यथा सप्त रथिकाः स तथायुधैः ।
भग्नखड्गेन चक्रेण दण्डेन च रिपुं न्यहन् ॥८४॥
निराकरोत्तु तत् सर्वं माया दूरं यथा प्रसूः ।
मशकान् सुप्ततनयात् करपद्मविधूननैः ॥८५॥
अभ्यधावल्लक्ष्मणं स रावणिः क्रोधमूर्च्छितः ।
गर्जन् भीमं यथा सिंहः पुरस्थितप्रहारकम् ॥८६॥
मायामोहितवीरेन्द्रो ददर्श परितो यमान् ।
आरूढभीममहिषाञ्छूलपाणिश्च शूलिनम् ॥८७॥
शङ्खचक्रगदापद्मधरं वीक्ष्य चतुर्भुजम् ।
युयुत्सु देववृन्दश्च विमाने चकितोऽभवत् ॥८८॥ (युग्मम्)

सविषादं विनिश्वस्य तस्थौ वीरो विधुर्यथा ।
राहुग्रस्तकलः किं वा पाशबद्धो मृगाधिपः ॥८६॥
त्यक्त्वा चापं महातेजा निष्कोषमकरोदसिम् ।
लक्ष्मणस्तेन च रिपोर्नेत्रे दग्धे बभूवतुः ॥६०॥
हन्तेन्द्रजिद् बली खड्गघातेन शोणिताप्लुतः ।
चुचुम्ब पृथिवीं सद्यश्चकम्पे च वसुन्धरा ॥६१॥
जगर्ज भैरवं सिन्धुः पूरितं विश्वमारवैः ।
स्वर्गे मर्त्ये च पाताले जीवाः सर्वे भयं गताः ॥६२॥
हैमसिंहासनस्थस्य रक्षोराजस्य शीर्षकम् ।
पपात सहसा भूमौ रथचूडेव खण्डिता ॥६३॥
दक्षिणाक्षि प्रमीलाया ननर्त्ताहो सती हठात् ।
विस्मृतात्मा ललाटस्थसिन्दूरबिन्दुमक्षिपत् ॥६४॥
मूर्च्छितं सहसा देव्या मन्दोदर्या महार्त्तया ।
शिशुनाक्रन्दितं मातृक्रोडे निद्राहृतात्मना ॥६५॥
यथा वा गोपशिशुभिर्गते श्याममणौ व्रजात् ।
वियोगतिमिराच्छन्नान्मधुपुर्यां व्यरुद्यत ॥६६॥ (युग्मम्)
युद्धेऽधर्म्ये निपतितो मेघनादः सुरं द्विषन् ।
क्रव्यादकुलसर्वस्व आह लक्ष्मणमप्रियम् ॥६७॥
वीरसंघकुलग्लानिं सौमित्रिं धिक् सहस्रधा ।
रावणस्याऽऽत्मजः किं भो बिभेति रविनन्दनात् ॥६८॥
पामराहं मृतस्तेऽस्त्राघातेनान्याय्यसंगरे ।
खेदोऽयं स्थास्यति स्वान्ते यावच्चन्द्रदिवाकरौ ॥६६॥
जितदैत्यकुलं शक्रं विजित्य समरेऽन्वहम् ।
हतस्त्वया केन धातः पापेन वोढुमक्षमः ॥१००॥
किमन्यद् वच्मि पाप त्वां वार्त्तेयं प्राप्स्यते यदा ।
रक्षोनाथेन केन त्वं त्रास्यसे समरेऽधम ॥१०१॥

प्रवेक्ष्यसि यदि तलं सागरागाधपाथसाम् ।
और्वानल-प्रभो राजरोषस्त्वां तत्र धक्ष्यति ॥१०२॥
निबिडं काननञ्चे त्त्वमाश्रयिष्यसि कातरः ।
नूनं दावोल्वणो रोषस्तस्य त्वां भस्म नेष्यति ॥१०३॥
नापिधास्यति रात्रिस्त्वां मूढ देवा न दानवाः ।
शक्ष्यन्ति रक्षितुं क्रुद्धाद्रावणाद्धतपुत्रकात् ॥१०४॥
को वा भङ्क्ष्यति विश्वे ते कलङ्कं घोरपापजम् ।
पातितं स्वं महापङ्के तथा रघुकुलं महत् ॥१०५॥
इयदुक्त्वा विषन्नः स स्मरन् पित्रोः पदाम्बुजम् ।
प्रमीलाननपूर्णेन्दुमभूच्चातीव विक्लवः ॥१०६॥
प्रेमाश्रूणि पङ्कजाक्ष्णोर्गलित्वाऽनर्गलं शतम् ।
सिषिचुर्धरणीं कृत्स्नां हेमन्तर्त्तौ हिमानि वा ॥१०७॥
निर्वाणार्च्चिरिवाप्पित्तं सूर्यो वा शान्तरश्मिकः ।
पतितः सोऽभवत्तत्र भूपृष्ठेऽसुविवर्जितः ॥१०८॥
विभीषणोऽश्रुनयनः शुशोच तं सुदुःखितः ।
विस्मारयति शोकार्त्तिर्वैरं स्वजनसम्भवा ॥१०९॥
सुपट्टशयनस्वापिन् केन दुःखेन भूतले ।
शेषेऽद्य त्वं महाबाहो रक्षोवंशसुधाकर ॥११०॥
शयानं धूलिशय्यायां वीक्ष्य त्वां राजनन्दन ।
किं नु वक्ष्यति ते तातस्त्रैलोक्यविजयी नृपः ॥१११॥
मन्दोदरी च ते माता रक्षोनृपकुलेन्दिरा ।
जितशारदेन्दुवक्त्रा पत्नी वा किं वदिष्यति ॥११२॥
जितदेवसुतारूपाः किङ्कर्यस्ते दितेः सुताः ।
वृद्धा पितामही साध्वी निकषा किं प्रवक्ष्यति ॥११३॥
रक्षांसि किं वदिष्यन्ति त्वं येषां कुलभूषणम् ।
तातोत्तिष्ठ खुल्लतातस्तव शब्दापयाम्यहम् ॥११४॥

शृणोषि न कथं वत्स मह्यं क्रुद्धोऽसि पुत्रक ।
द्वारं मुञ्चामि सद्यस्ते गच्छाऽऽशु शस्त्रमन्दिरम् ॥११५॥
निशाचरसरःपद्म लङ्कागौरवभास्कर ।
कलङ्कं मोचयाद्य त्वं मध्याह्नेऽर्कस्तिरोऽस्ति किम् ॥११६॥
यशस्विन् कथमद्य त्वं शयानोऽसि महीतले ।
शृणु शृङ्गध्वान दन्तिवरास्त्वामाह्वयन्ति च ॥११७॥
हेषन्ते भैरवं वाहाः संनह्यन्ति च सैनिकाः ।
दुर्हृदो रुन्धते द्वारं नगरस्य निरस्य तान् ॥११८॥ (युग्मकम्)
रक्षःकुलोच्चसस्मानं रक्ष रक्षोनृपात्मज ।
विललाप भृशं दीन एवं बली विभीषणः ॥११९॥
मित्रं निरीक्ष्य शोकार्त्तमूचे सौमित्रिकेशरी ।
विज्ञवर्य त्यज खेदं किं विलापेन लभ्यते ॥१२०॥
विधिना नोदितोऽहं ते न्यहनं पूर्वजात्मजम् ।
दोषगन्धो न तेऽस्त्यत्र शिबिरं गच्छ साम्प्रतम् ॥१२१॥
तत्र चिन्ताकुलश्चिन्तामणिरस्ति विनाऽनुजम् ।
आकर्णय शुभातोद्यं ध्वनति त्रिदशालये ॥१२२॥
श्रुतो विभीषणेनासौ वादित्रध्वनिरद्भुतः ।
सुरालयाद् यथा स्वप्नाविष्टवत् सुमनोहरः ॥१२३॥
निर्जग्मतुरुभौ तूर्णं शार्दूल्याः सन्निधौ यथा ।
हतव्याघ्रशिशुर्व्याधस्त्वरितः प्रपलायते ॥१२४॥
यद्वा द्रौणिर्यथा रात्रौ हत्वा पञ्च शिशून द्रुतम् ।
निर्ययौ शिबिरात पाण्डुसुतानां राजतुष्टये ॥१२५॥
अदृश्यौ चेलतुर्मायाप्रसादेन यतः स्थितः ।
निवेशे मैथिलीकान्तो हितार्थी भ्रातृमित्रयोः ॥१२६॥
बद्धाञ्जलिः प्रणम्याङ्घ्रिपद्मे सौमित्रिरब्रवीत् ।
किङ्करोऽयं जयी जातो हत्वेन्द्रजितमाहवे ॥१२७॥

चुम्बित्वा मस्तकं रामः परिष्वज्य च लक्ष्मणम् ।
बाष्परुद्धस्वरं प्राह हर्षाश्रुप्लावितानन: ॥१२८॥
त्वद्बाहुविक्रमेणाद्यालप्स्येऽहं जानकीं पुनः ।
धन्यस्त्वं वीरगर्वोऽसि रत्नगर्भा प्रसूस्तव ॥१२९॥
नूनं दशरथः श्लाघ्यो यस्त्वां सूनुमजीजनत् ।
पूर्वजोऽहं चिरं धन्यो धन्याऽयोध्या च जन्मभूः ॥१३०॥
आकल्पं ते यशः स्थायि व्याप्य भूमिमथो दिवम् ।
नृभ्योऽवलेभ्यो दातृ त्वं शक्तेर्देवं समर्चय ॥१३१॥
विभीषणं स सम्बोध्य मित्ररत्नं मधुस्वरम् ।
प्राह मित्रालभेऽहं त्वां सुक्षणे रक्षसां पुरे ॥१३२॥
इक्ष्वाकुकुलकल्याणकुम्भ क्रीतं रघोः कुलम् ।
त्वया निजगुणैर्मित्र यथा मित्रोऽन्वयेश्वरः ॥१३३॥
सर्वे गच्छत देवीं तां यक्ष्यामहे शुभङ्करीम् ।
यत् कृपापाङ्गपातेन कृतार्थाः स्मो वयं रणे ॥१३४॥

अमरा ववृषुः कुसुमानि दिवः
ककुभो जयमङ्गलनादवृताः ।
शिविरं परितः पृतना रुरुवुः
पुरवासिजनाश्चकिता अभवन् ॥१३५॥

इति श्रीमेघनादवधे महाकाव्ये इन्द्रजिद्वधो नाम
अष्टादशः सर्गः ।

भाषारत्नम्

श्रीकणादतर्कवागीश-प्रणीतो नव्यन्यायमतसिद्ध-पदार्थ-
प्रतिपादको ग्रन्थः

कलिकाता-राजकीयसंस्कृतमहाविद्यालयन्यायशास्त्रान्यतराध्यापक-

श्रीकालीपदतर्काचार्य-

सम्पादितम्।

एष ग्रन्थः सरलया सरण्या तर्कशास्त्रप्रसिद्धान् पदार्थान् प्रतिपादयन् सुबहुप्राचीनकालात् प्रभृत्येव पण्डितसमाजे सुविश्रुतो लक्ष्यते। अत्र पदार्थसिद्धौ समपेक्षिता युक्तयः सुगमया दिशा परिगृहीता महान्तमुपकारं जनयन्ति तर्कशास्त्रं प्रविविक्षताम्। विद्यार्थिनां सुखेनावगमाय सम्पादकमहोदयेनात्र सरला काचित् टीकापि संयोजिता। अत्र विस्तृता विषयसूची भूमिकायां न्यायमतसिद्धानेक-पारिभाषिक-पदार्थविवृतिश्च सन्निवेशिता, येन संस्करणस्यास्य नितरामुत्कर्षः समजनि।

एष ग्रन्थ इतः पूर्वं कदापि केनापि न प्रकाशितः। अतः अप्रकाशितपूर्वस्यास्य ग्रन्थस्य परमोपादेयस्य लाभेन विद्यार्थिनः अध्यापकाश्च सुतरामुपकृता भविष्यन्तीति निःसंशयो वादः।

अचिरमेष प्रकाश्यते, तत् सत्वरा भवन्तु श्रीमन्तस्तर्कपदार्थ-विज्ञानरसिका येन कालातिक्रमो नाभिलषितसिद्धिं प्रतिबध्नीयात्।

अस्य प्राप्तिस्थानम्

संस्कृत-साहित्य-परिषत-कार्यालयः

१७ आर. जि. कर रोड, श्यामवाजार, कलिकाता।

Reg. No. C. 1073

Vol. XVIII, No. 11] [March, 1936.

१८५७ शकीये फाल्गुने १८श-वर्षस्य ११श-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्



सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—३) रूप्यकत्रयम्

श्यामबाजार, कलिकाता । Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,

Shyambazar, Calcutta.

Printed at

CALCUTTA ORIENTAL PRESS

9, Panchanan Ghose Lane, Calcutta.

সুলভে পুস্তক-বিক্রয়

কোনও পুস্তক-বিক্রেতার নিকট হইতে পরিষৎ কয়েক কপি নিম্নলিখিত পুস্তক পাইয়াছেন, পুস্তকগুলি শীঘ্র বিক্রী করিয়া ফেলার জন্য সর্ব্বসাধারণকে আগামী ৩১শে জ্যৈষ্ঠ পর্য্যন্ত শতকরা ২৫৲ টাকা হারে কমিশন দেওয়া হইবে। পুস্তকগুলি বোর্ড বাঁধান।

সাংখ্যদর্শনের আদ্য পরীক্ষায় পাঠ্য—

যোগসূত্রবৃত্তি—

(মণিপ্রভা টীকা, হিন্দী ও বঙ্গভাষানুবাদ, সূত্রপাঠ ও সূত্রানুক্রমণিকা সহিত) মূল্য—১৷৷৹ স্থলে ১৵৹

কাব্যের মধ্য পরীক্ষায় পাঠ্য—

কিরাতার্জ্জুনীয়ম্—

(মূল, অন্বয়, বাচ্যান্তর, অনুক্তালঙ্কার-নির্দ্দেশ, মল্লিনাথটীকা, হিন্দী ও বঙ্গভাষানুবাদ, বিস্তৃত সমালোচনা ও গ্রন্থকার-জীবনকথা সহ) মূল্য—৩৲ স্থলে ২৷৵৹

পুস্তক-প্রাপ্তির ঠিকানা—

সংস্কৃত-সাহিত্য-পরিষৎ

১৭, আর. জি. কর রোড, শ্যামবাজার

কলিকাতা।

শাস্ত্রব্যাখ্যা—আগামী ১২ই বৈশাখ, শনিবার হইতে প্রতি শনিবার সংস্কৃত-সাহিত্য-পরিষদ্ভবনে **শ্রীযুক্ত জানকীনাথ সাহিত্যশাস্ত্রী** মহাশয় পুরাণাদি শাস্ত্রীয় গ্রন্থের ব্যাখ্যা করিবেন। ধর্ম্মশাস্ত্রে জ্ঞানাভিলাষী ব্যক্তিগণের উপস্থিতি একান্ত প্রার্থনীয়।

संस्कृतसाहित्यपरिषत्

March, 1936.	१८५७-शकीये फाल्गुने १८श-वर्षस्य ११श-संख्या	Vol. XVIII No. 11

रामायणीयमध्यात्मतत्त्वम्

[निबन्धकः—वरदराजशर्मा]

हेतुवादावष्टम्भेन विस्रब्धमुच्छृङ्खलं च प्रवर्तमानं भारतीयानामस्माकं विज्ञान-शास्त्रविवेचकंमन्यानां प्रज्ञाचक्षुः, वेदान, पुराणानि, धर्मशास्त्राणि, चान्या-दृश्यैव रीत्याऽवेक्षितुमारभतेति महदिदमामोदस्थानमथवा विषादस्थानम्। एतान्येव शास्त्राणि भारतीयानां सर्वेषां धर्माचारव्यवस्थां सामयिकाचारान सांव्यवहारिकधर्मकलापांश्च विविधाः कलाश्चानाकुलमाकलयन्ति कालमनल्प-मराजन्ततमाम। अथचासदृशचेष्टाव्यवहारैः पाश्चात्त्यैरजनि सुदृढः सम्पर्कः तदीयव्यवस्थाभिर्व्यतिकरश्चान्वजायत। ऐहिकमभ्युदयमेव परमं पुरुषार्थं मन्यमानानां प्रभविष्णूनां पाश्चात्त्यानां धर्मव्यवस्थासम्भेदे, अलौकिके निःश्रेयसे प्रवृत्तानां भारतीयानां समुदाचारो दृढं प्रतिहत इव प्रतीपं परावर्तत।

सत्यमियं लोकोक्तिः भवितव्यता बलवतीति। यत्कोऽपि सुदृढः सुप्रतिष्ठितो निर्दोषश्च क्षीयते न तत्र परप्रकर्षो गुणवत्ता च निमित्तम्, किन्तर्हि विचित्रा अचिन्त्यप्रभावा दैवी गतिः। एकपद एव पूर्वाचार्यकृता व्यवस्था तेषामेव चाऽऽचाराः किं बहुना सर्वमेव प्रत्नं रत्नजातं मृतकल्पमशोभनमज्ञचेष्टित-

मनर्थावहं राज्यसमुन्नतिपरिपन्थीति च मिथ्याप्रत्ययो बहूनामस्माकं मनांस्यास्कन्दयति। नैके चोपदेष्टारो भवन्ति अदृष्टपूर्वस्याश्रुतचरस्यापि सामयिकाचारस्य सांव्यवहारिकधर्मसन्ततेश्च। इदमेव सा दुःखकथाऽस्माकम् अतीतेषु विंशत्यां शतकेषु यामादयाद्य भारतपुण्यपुञ्जायमानाः श्रुतिस्मृति-कल्पलतिकानिकुञ्जायमानाश्चानेके सुजनाः क्लिश्यन्तितमाम्।

कियत्स्वेव धार्मिकपरिगृहीतेषु महान्तमुद्वेगसन्दोहमनभिष्वङ्गं चोपजनयन्ती अभ्युदयलिप्सा स्वानन्त्यलोभश्च नितरां नश्चित्तमुत्तेजयति। अभ्युदयभावना सन्त्यपि चेतोरागरूषिता भावुकोदयपिशुना कथं कथं नोपच्छन्दयति। परन्तु विरुद्धस्यासम्यग् ज्ञातस्य वैदेशिकाचरणस्य कीशानेकारं (?) कियन्तमपि कालं भारतीयानामनुकृतिः परिहास्यतां प्राप्तकालं कर्तव्ये कर्मण्यालस्यमपाटवं चोपानैषीत्।

बुभुक्षितो हि भोजनं गवेषयतीति, आभाणकमनुसृत्य पुरातन-विद्यास्थानपेटिकासम्पुटितानां क्लिष्टकान्तीनां रत्नविशेषाणां परीक्षणे संस्करणे तत्प्रयोजनविचिकित्स्यायां विनष्टकल्पायाः पूर्वाचार्यव्यवस्थायाः पुनरुज्जीवनोपायेषु च साम्प्रतं प्रावर्तत। अचिरप्रवृत्तो ह्येष गवेषणाक्रमः, तदवश्यमेव प्रत्नानां विद्याराशीनां यथावदवबोधे भवन्त्येव विभिन्नानि प्रस्थानानि। अस्यां च गवेषणायां पुरातनविद्यास्थानेष्वन्यतमं भारतं तथा रामायणमपि गोचरीभवतः। केचन सुनिरूपितवस्तूत्पन्नं सुश्लिष्टं कथाजालमिति, अन्येऽप्यायनं जीवनचरित्रमिति, अपरे धर्मा-धर्मफलप्रतिपादनेन धर्माधर्मयोर्लब्ध्ववबोधकमिति, इतरे तादात्विक-भूसंस्थानप्रतिपादकमिति चान्यथान्यथोल्लिखन्ति। न तादृशोऽपि जना विरला ये नाम कस्यापि वश्यवाचो रसिकस्योत्प्रेक्षकस्य प्रज्ञाविलक्षितमिति दूरतः परिहरन्ति, अश्रद्धेयत्वं चैतयोर्वदन्ति।

नच न सन्ति तेषां युक्त्याभासाः। कीनाशा भल्लुकाश्च विवेचयन्ति। काल्पनिकं निरयं विहाय क वा दशाननस्तदनुयायिवर्गश्च निपात्यताम्। उच्चावचमुच्चलद्वीचिमालिनि सलिलराशौ निबद्धायाः सेतोरवज्ञैषा क वा

प्रक्षिप्ता कुत्र च विभीषणादयश्चिरजीविनोऽवस्थिताः। साहसिकानां सुनिपुणदृशामाधुनिकानाम् अक्षिपथमतीत्य लङ्का वा कुत्र निलीयताम्। एवं भारतस्यापि रचयिता कः। स किमेकोऽथवाऽनेके। अष्टादशपुराणानां महाभारतस्य च प्रणेता व्यास एक इति तु न सुधीमधुरम्। नह्येको व्यासः, कर्ता भवितुमर्हति। सम्पादको वा स्यात्। अधुनोपलभ्यमानानि सर्वाण्यप्याख्यानकानि किं प्रथममेव भारते पदमलभन्त। आहो तदा तदा तेन तेनोपक्षिप्तानि, एताश्चान्याश्चाप्रत्ययधूलिक्षेपनालीकयन्त्रायमाणा अनल्पाः कल्पना निरर्गलं निर्गलन्ति।

यथा तथा भवतु, नहि भवति वचनमात्रेण वस्तुनोऽन्यथाभावः। स्फुरत्येव कोऽप्यर्थविशेषः सूक्ष्मया दृशा पुराणगणपारावारमाकलयतां अगाधस्तिमितहृदनिमग्नो रत्नराशिरिव रत्नाकरस्य।

नितरामनुशोचनीयाश्च ते ये पुराणानां प्रामाण्यसिद्धयर्थं कर्तृकालादि-निर्णये प्रयतन्ते। ये चान्ये चरित्रनिबन्धकाः परीक्षकेक्षिकया प्रवर्तन्ते न तेषां ततो निवारणमपि युक्तम्। यतस्तेऽपि महनीयमतयः किमपि जानन्ति। एतेषां तु पुराणानां प्रामाण्यमवबोधकत्वादबाधितबोधकत्वाच्च स्वयं सिध्यति। नह्यग्निरुष्ण इति वाक्यमकर्तृकमज्ञातकर्तृकमपि प्रामाण्यात्प्रच्यवते। न बोधकत्वाद्भ्रंशते। न वाऽज्ञातार्थावगमयितृत्वं नास्ति।

सत्यमिदमुच्यते महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते, यत इदं शत-सहस्रवृत्तिवनराजिराजितं नीतिवल्लरीविकटवेष्टनप्रतिष्टम्भिताज्ञजनप्रचारम् आख्यायिकावल्मीकनिलीनदार्शनिकतत्त्वकाद्रवेयकुलाकुलम् कविजनकरि-वराक्रान्तम् आक्रान्तदर्शिपरिहृतप्रान्तं राजधर्ममृगेन्द्रजुष्टम् अकृतधिषण-हरिणगणजुष्टम् मोक्षधर्मप्रस्रवणपवित्रिताभ्यन्तरम् प्राज्ञप्रदर्शितवर्तनीसमुत्सेधं च महारण्यमिव सुकुमारधियां स्पृहणीयपदवीं नाधिरोहति महाभारतम्। रामायणं तु सहृदयमधुकरजुष्टम् उपमास्वभावोक्त्यादिविविधललितलता-वितानमञ्जुलम् नवरसप्रसवभासुरम् अध्यात्मतत्त्वपरिमलोद्गारि चोपवन-

मिवातिरमणीयम् । अध्यात्मरामायणप्रतिपादितानां वाल्मीकिरामायण-संसूचितानां केषामपि अध्यात्मतत्त्वानामाविष्करणमेवास्य परं लक्ष्यम् ।

रामायणम्

इयं हि कथा आध्यात्मिकाधिभौतिकसुखदुःखजयपराजयादित्रिविध-वेदनाविशकलितस्य जीवात्मनो ब्रह्मभावापत्तिपरा । भास्वतो विवस्वतोऽभिजनेऽभिजातेन अहंपदवाच्यस्थानीयेन दशरथेनोपक्रम्यते । अन्तःकरणस्य तैजसत्वमौपनिषदम् । अन्यैरपि दार्शनिकैरुपदिष्टम् । "तैजसमन्तःकरणं चक्षुर्द्वारा निर्गत्य विषयदेशं गत्वा तदाकारेण परिणमते" इत्यादि । आत्मनोऽपि अहंपदवाच्यत्वमस्यैव सम्बन्ध आपादयति । मन एव मनुष्याणां कारणं बन्धमोक्षयोः । अस्मिन्नेव चानाद्यन्तरहितमिदं संसारचक्र-मतास्यदश्रास्यच्च परिभ्रमति । वैवस्वतो वंशश्चासौ, यां विना जगत उत्पत्ति-विनाशौ न स्तः, यामाश्रित्य अन्तःकरणस्याप्यात्मलाभोऽजनि, यैषा प्रकृति-रिति मायेति अज्ञानमिति च व्यवह्रियते । दशरथोऽपि, रथस्थानीयस्य कर्मेन्द्रिय-ज्ञानेन्द्रियात्मकैर्दशभिर्वाजिभिरुह्यमानस्य स्वामी, पञ्चकोशात्म-कस्य अयोध्यानगरस्य पालको राजा । 'नवद्वारे पुरे देही,' 'पुरमेकादशद्वारं,' 'आत्मानं रथिनं विद्धि,, 'इन्द्रियाणि हयानाहुः,' इत्याद्यौपनिषदवाक्येषु शरीरस्य रथत्वेनाऽऽत्मनो रथित्वेन च रूपणं बहुलमुपलभ्यते । परागन्तः-करणानुधावित्वाच्चास्य भवतीव तदनुविधायी द्वन्द्वानुभवोऽपि । अस्य च राज्ञस्तिस्रो नायिकाः कौसल्या-कैकेयी-सुमित्राख्याः निवृत्ति-प्रवृत्ति-भक्ति-स्थानीयाः । आम्नायप्रत्यादेशो वसिष्ठोऽस्य गुरुर्विधारको नियन्ता च । प्रभुकल्पो धर्माधर्मवर्णाश्रमादिविधारको हि वेदः । अनृतज्ञान्तःकरणानु-धाविनः तद्धर्मानात्मीयान्मन्यमानस्य जीवस्योपदेष्टा ज्ञानमूर्तिर्वेद एवेत्ये-तन्निर्विवादम् । अनपत्योऽसौ राजा पुत्रानैच्छत् । किं करोतु तपस्वी । संसार-सागरपतितस्य प्रेयस्साधनं पुण्यकर्मैवेति राजाऽसौ गुरोर्वसिष्ठस्य निदेशेन पुत्रीयामिष्टिमन्वतिष्ठत । चत्वारः पुत्रानविन्दत । ज्ञान-विवेक-वैराग्य-विचारस्थानीयास्ते यथाक्रमं राम-लक्ष्मण-भरत-शत्रुघ्नाख्या अभूवन् ।

राजाऽपि मन्देतरमानन्दमवाप । पुत्रानेवानारतमादध्यौ । वीथीषु विचरतः उपश्लिष्टबालचापलानेतान् प्रत्यहं गुणैर्विद्यया रामणीयकतया गाम्भीर्येण च समेधमानान् प्रेमगर्भया दृशा प्रमोदजडेन वपुषा च दृढं परिष्वज्याऽऽत्मानं कृतार्थममन्यत ।

अन्तःकरणं हि बुद्धिसहकृतं नित्यादनित्यं सुखाद् दुःखं सत्यादनृतं च साधु विविच्य वैराग्यानुगृहीतम् अनित्यादशुभादनृताच्च प्रतीपं निवर्त्य नित्ये शुभे सत्ये चाविरतं निदिध्यासनयोगसम्पादनेन विवेकोदये विजातीयवृत्त्यनन्तरितां प्रज्ञानधारामासादयति । "तं विद्याद्दुःखसंयोग-वियोगं योगलक्षणं यं लब्ध्वा चापरं लाभं मन्यते नाधिकन्ततः । यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ।" इत्यादि चात्राऽऽकल-नीयम् । तेषु चतुर्षु लक्ष्मणो रामानुयायी शत्रुघ्नो भरताविनाभावी चाभूत् । विवेको हि भवति विज्ञानवान् । विचारेण वैराग्यमपि दृढमापाद्यते । अथ कदाचिदेभिश्चतुर्भिरपि पुत्रैः सभामध्यमध्यासीनं दशरथं श्रद्धाविवेश । योऽसौ विज्ञानार्थी विश्वामित्र इति कविनोपवर्णितः । अयमृषिर्दशरथ-माससाद ।

विपरिणमितम् ॥

अवशिष्टमुपरिष्टात् ।

दत्ता

तृतीयः परिच्छेदः

मासद्वयं वर्त्तत उपरतस्य वनमालिनः। तस्य कलिकातावर्त्तिनि तत्तादृशे महति भवने सम्प्रत्येकैव विजया। तस्य देशस्थाया भूसम्पदो रक्षणावेक्षणे रासविहार्येव निर्वर्त्तयन्नासीत्। तेन च सूत्रेण स तस्याः कथञ्चित् प्रभुरेव भवन्नवसत्। परं स्वयं ग्रामे वर्त्तत इति तनये विलासविहारिण्येव विन्यासि विजयायाः सर्वोऽपि तत्त्वावधानभारः। स एव तस्या वस्तुतः प्रभुरभवत्।

तदानीं प्रतिब्राह्मपरिवारं 'सत्यं' 'सुनीतिः' 'सुरुचिः' इत्येते शब्दा बाढमुच्चैरशिक्ष्यन्त। तस्य हेतुश्च—पाठार्थं विदेशमागता हिन्दुयुवानो यदा पित्रोर्देवानां प्रतिष्ठितस्य समाजस्य च प्रतिपक्षीभूय विद्रोहमन्वतिष्ठन् तदा खल्वेत एव शब्दा अवलम्बीभवन्तस्तेषामपरिणतं मस्तकं मा नामावनम्य भज्येतेत्यधिशिरोधरमृजुतया न्यदधुः। त एवमजल्पन्—यत् सत्यमित्यवधारयिष्यसि, तदेव विधास्यसि। मातुर्बाष्पो वा पितुर्दीर्घश्वासो वा किमपि न दर्शनीयमाकर्णनीयं वा। सेयं दुर्बलता सर्वथा परिहर्त्तव्या, नो चेदालोकस्य सन्धानं नैव लप्स्यसे। वाक्यान्यमूनि विजययाऽप्यशिक्ष्यन्त।

अद्य विलासमहोदयो मत्तस्य प्रवयसो जगदीशस्य मृत्युवार्त्तामादाय ग्रामादुपागतः। कामं स पितृबन्धुरेव विजयायाः, परं यदा विलासमहोदयो वक्तुं प्राक्रमत—कथं कृत्वा जगदीशो मद्यं पीत्वा मत्तः सन् छदेरुपरिष्टात पतन् व्यपद्यत—तदा ब्रह्मधर्मस्य सुनीतिं स्मरन्ती विजया दुर्भाग्यस्यास्य पितृसखस्य विरुन्धाना जुगुप्सया ओष्ठं विकर्त्तुं लेशतोऽपि न द्वैधीभावममन्यत। विलासो वदति—जगदीशमुखोपाध्यायो ममापि पितुर्बाल्यबन्धुरासीत्। किन्तु तत्रभवांस्तस्य मुखमपि नापश्यत्। ऋणार्थं वारद्वयमुपागमत सः, परं तातो भृत्यद्वारा तं गोपुराद्बहिरकरोत्। स सर्वदैवा-

वादीन्—एतेभ्यो दुर्नयपरेभ्यो जनसमाजेभ्यो दयमानैर्मङ्गलमयस्य भगवत-श्चरणयोरपराधः कृतः स्यात् ।

अभ्युपगमस्य विजययोक्तत्, सुतरामेव सत्यं वचः ।

लब्धोत्साहो विलासो वक्तृभङ्ग्या वचनं प्रावर्त्तयत्—बन्धुरे-वास्तु अथ यो वाऽस्तु, दौर्बल्यवशेन ब्राह्मसमाजस्य चरम आदर्शो न चूर्णयितव्यः । जगदीशस्य सर्वाः सम्पद इदानीं न्यायतोऽस्माकमेव । तस्य सुतः पितुर्ऋणं शोद्धुमर्हति चेत सम्यक्, अथ न शक्नुयात्, राज-शासनानुसारेणेदानीमेव सर्वं हस्ते कर्त्तव्यम् । वस्तुतः, परित्यक्तुं नास्ति नः कोऽप्यधिकारः । यतो वयमेभिर्द्रव्यैरनेकं सत् कर्म कर्त्तुमर्हेम । समाजस्य कमपि बालमांग्लभूमावपि प्रेरयितुमर्हेम । धर्मप्रचारार्थं व्ययीकर्त्तुमर्हेम कति कर्त्तुमर्हेम्—ब्रवीतु भवती कथं तन्न कुर्याम । अन्यच्च—जगदीश-महोदयस्ततपुत्रो वा नास्मत्समाजस्यान्तर्निविशते, येन तत्र कापि दया आवश्यकी । लब्धमात्रायामेव भवत्याः सम्मतौ पितृदेवः सर्वं सुसमञ्जसं विधास्यतीति कृत्वाऽद्य मां भवत्याः समीपे प्रैषयत् ।

विजया मृतस्य पितुः शेषवचनानि स्मरन्ती चिन्तयितुं प्रावर्त्तत—सद्यः प्रत्युत्तरं कर्त्तुं नाशक्नोत् । तां विचिकित्सन्तीमभिवीक्ष्य विलासः सबलं दृढेन कण्ठेन प्रावदत्—नहि नहि, नाहं भवतीं कथमपीतस्ततः कर्त्तुम् अनुमंस्ये । पापं नाम द्वैधं दुर्बलता च । केवलं पापमिति न, महा-पापम् । मया मनसि सङ्कल्पः कृतः, तस्य भवने भवत्या नाम्ना—यत कुत्रापि नास्ति, कुत्रापि नाभूत्—अहं तदेव करिष्यामि—पल्ल्यां ब्राह्म-मन्दिरं प्रतिष्ठाप्य देशवासिनो हतभागधेयान मूर्खान् धर्मं शिक्षयिष्यामि । चिन्तयतु तावद् भवती वारमेकम्, एषां मूर्खतयैव विरज्यमानो भवत्याः स्वर्गीयः पितृदेवो देशमजहान्न वा ? किं नोचितं ततकन्यकया भवन्त्या भवत्या इमाम् उदात्तां वैरशुद्धिं गृह्णत्या तेषामेवायं चरम उपकारः कर्त्तुम् ? उच्यताम्, भवत्यैवास्योत्तरं दीयताम् ।

विजयया चलच्चित्तयाऽभूयत । विलासो दृप्तस्वरेणावोचत ; सर्वस्मिन

देशमध्ये कियदेकं विस्तृतं नाम, कियदेकं महदान्दोलनमुत्थास्यतीति चिन्तयतु भवती। हैन्दवैः स्वीकर्त्तव्यमेव—तद्वारो मयि—यद् ब्राह्मसमाजे मानवोऽस्ति हृदयमस्ति स्वार्थत्यागोऽस्ति। यं ते निपीडयन्तो देशाद्वय-सर्जयन्, तस्यैव महात्मनो महीयस्या कन्यकया तेषामेव मङ्गलार्थं विपुलोऽयं स्वार्थत्यागः कृतः। ब्रवीतु तावद्भवती साधुरयं दृष्टान्तः समग्रं भारतमभिव्याप्य कीदृशं नाम शुभोदर्कं फलं प्रसुवीत। उक्त्वैयद्विलासविहारी सम्मुखवर्त्तिन्यामासन्दिकायां प्रचण्डं तलप्रहारमकरोत्। शृण्वती विजया मुग्धा जाता। वस्तुतोऽशक्य एवाष्टादशवर्षीयया कन्यकया तथाविधस्य यशसो लोभः संवरीतुम्। तया परिपूर्णां सम्मतिं प्रदायोक्तम्, तस्य पुत्रस्य नाम नरेन्द्रमश्रौषम्। इदानीं स क्वास्ते, अपि जानाति भवान् ?

ज्ञायते। हतभाग्यस्य पितुर्मरणात् परं स गृहमागत्य पितुः श्राद्धं विधायेदानीं देश एवास्ते।

मन्ये भवता साकं परिचयोऽस्ति।

परिचय इति ? शान्तं पापम्। उच्यताम्, भवत्याऽहं क इव मन्ये। इत्युक्त्वा विलासमहोदयो विजयामेकान्ततोऽप्रतिभां विधाय किञ्चित् स्मित्वाऽवदत्, मया तु चिन्तयितुमपि न शक्यते यद् जगदीश-मुखोपाध्यायस्य पुत्रेण साकमालपामि। परं तस्मिन्नहनि पथि हठात् कञ्चनोन्मत्तकल्पं नवीनं जनमालोक्य चित्रीये स्म। श्रुतं स एव नरेन्द्र-मुखोपाध्याय इति।

विजयया कुतूहलिन्या कथितम्, कथम् उन्मत्तकल्पः ? श्रूयते भिषक् किलायम्।

विलासमहोदयो जुगुप्सया सर्वाण्यङ्गानि संकोचयन् अवोचत्, सर्वथोन्मत्तकल्पः। भिषगिति ? नाहं विश्वसिमि। शिरसि आयतः केशः—यथा दीर्घकायस्तथा रुग्णः (कृशः)। वक्षसः प्रतिपञ्जरं दूरादेव गणेयमिति मन्ये। इयं नामाऽऽकृतिः। तालदलमयो योद्धा ! धिक् !

वस्तुत आकृतिमधिकृत्य गर्वितुं विलासोऽधिकारी। यतः स खर्वः स्थूलः सुतरां शक्तिमांश्च। तस्य वक्षसः पञ्जराणि आग्नेयास्त्र (बोमा) प्रहारेणाप्यनिर्देश्यानि। स भूयोऽपि किमपि वक्तुं प्रक्रमन् विजयया प्रतिषिध्य पृष्टः—अस्तु, विलासमहोदय, जगदीशमहोदयस्य भवनं यदि सत्यमेव वयं स्वायत्तीकुर्याम, किं ग्रामान्तः कश्चित कटुर्जनापवादो नोत्तिष्ठेत् ?

विलासः सबलमुदैरयत्, एकान्ततो नैव। पञ्चसप्तानां ग्रामाणामन्तरेवमेकोऽपि मानवो भवत्या नाप्स्यते यस्यामुष्य मत्तस्योपरि बिन्दुमात्रापि समानुभूतिरासीत्। 'हा' शब्दं कुर्यादेवं जनस्तस्यां पल्ल्यां नास्ति। किञ्चिद् हसित्वाऽवदत, तदपि नाम यदि न स्यात्—तथापि जीवति मयि सा चिन्ता भवत्या मनसि न विधेया। परमहं ब्रवीमि, अन्ततः क्रियतेचिद्विसाय भवत्या सकृद् देशं प्रति गन्तव्यम्।

चित्रीयमाणया विजयया पृष्टम्, कथम् ? अस्माभिः कदापि न तत्र गम्यते ? विलासः प्रदीप्तकण्ठमवोचत, तत एव ब्रवीमि, भवत्या गमनं काम्यत एव ! प्रजास्तासां महाराज्ञीः सकृद् दर्शयतु भवती, मया तु ध्रुवं मन्यते अस्मात् सौभाग्यात्तासां वञ्चना महापापम्।

लज्जया विजयायाः सर्वं वदनमण्डलमालोहितं जातम्। साऽवनतेन वदनेन किमपि वक्तुमुपक्रमन्त्येव विलासेन प्रतिबध्योक्ता, नात्र इतस्ततः कर्त्तुं किमप्यस्ति। सकृत् चिन्तयतु तावत्, कियन्ति नाम कर्माणि तत्र भवत्याः कर्त्तव्यत्वेन वर्तन्ते। इयं नाम कथाऽद्य भवत्याः सम्मुखमेव मया वक्तुं शक्यते, यद् भवत्यास्तातपादाः सर्वस्य देशस्य प्रभवोऽपि यत् केषाञ्चन क्षिप्तानां शुनां त्रासेन भूयः कदापि न ग्रामे प्रत्यावर्तन्त तत किं तैः सम्यग् आचरितम्। किमयमस्माकं ब्राह्मसमाजस्याऽऽदर्शः ? नायं कस्यापि समाजस्याऽऽदर्श इति कोऽत्र भ्रमः।

विजया क्षणं तूष्णींभूयावोचत, श्रुतन्तु पितुर्मुखात अस्मदीयं देशस्य भवनं न वासोपयोगीति।

विलासेनोक्तम्, आदिशतु भवती, सकृद् वदतु तत्र गमिष्यति,—अहमर्वाग् दशाहात् तद् वासोपयोगि विधास्यामि। मयि भारो न्यस्यताम्, यथा तद् भवनं भवत्या मर्यादां वोढुं शक्नुयात्, मया प्राणानपि पणीकृत्य तस्य व्यवस्था विधास्यते। पश्यतु, बहोः कालात् काचित् कथा मे मनसि समुदेति—भवतीं केवलं सम्मुखीनां विधायाहं यत् कर्त्तुमर्हामि, तस्य मन्ये सीमा नास्ति।

प्रातिष्ठत विलासो विजयाम् अनुमतां विधाय। सा तत्रैव तूष्णीमवसत्। यो हि तस्या देशस्तत्र सा कामं जन्मनः प्रभृति कदापि न गता, किन्तु अन्तरान्तरा पितुर्मुखात् तस्य कियतीं वा वर्णनां नाश्रृणोत्। देशस्य पुरावृत्तं कथयतस्तस्योत्साहश्चानन्दश्च न मितः स्म। परं तदानीं सा कथा तस्यः मनः कियन्मात्रमप्याक्रष्टुं नाशक्नोत्। यथैवाश्रृणोत् तथैव प्रास्मरत्। परमद्य कुतः पुनरकस्मात् प्रत्यावृत्तं तदखिलं प्रस्मृतं विवरणम् एकपदे मूर्त्तिं परिगृह्य तस्या नयनयोरुपरि प्रत्यभात्। आसीच्च तस्या मनसि, कामं तासां ग्रामस्थं भवनं कलिकातस्थमिदं भवनमिव न सुबृहच्चाकचिक्यमयञ्च, परं तदेव तस्याः साप्तपौरुषिकी वास्तुभूमिः। तत्र पितामहपितामह्यौ प्रपितामहप्रपितामह्यौ तासामपि जनकजनन्यः, एवमेव कियतां पुरुषाणां सुखदुःखाभ्याम् उत्सवव्यासनाभ्याञ्च यदि दिनान्यत्यक्रामन् तदा तस्या अपि किं नातिक्रमेयुः।

क्षुद्ररथ्याया अग्रतो 'हाजरा' वंशीयानां त्रितलस्य भवनस्यान्तराले सूर्योऽदृश्यतां गतः। विषयमिमधिकृत्य पित्रा सह तस्याः कति दिनानि कियती कथा संवृत्ता। तस्या मनस्यभूत्। कतिपु सन्ध्यासु सोऽमुष्यामासन्दिकायामुपविश्य दीर्घश्वासं निःसारयन्नवोचत्, विजये, मम देशस्थे भवने कदापीत्थं दुःखं नानुभूतम्। तत्र कस्यापि 'हाजरा' वंशस्य त्रितलच्छदिरस्तं गच्छतः सूर्यस्य शेषं रश्मिजालमेवं कृत्वा मत्तो व्यवधाय नोदतिष्ठत्। मातस्त्वं तु न जानीषे, परं मम चक्षुर्द्वितयम् एतद्गवाक्षोमध्याद-सकलया दृष्ट्या निरीक्षमाणमास्ते। तत् स्पष्टं पश्यति, अस्माकं

पुष्पोद्यानसमीपस्था क्षुद्रा तटिनी अस्यां वेलायां सौवर्णसलिलेन टलटलायमाना वर्तते। अथ तस्यास्तीरे यावद्दूरं दृष्टिः प्रसरति ; क्षेत्रात् परं क्षेत्रं तत्सीमान्ते इदानीमपि सूर्यो देवो यियासुरपि ग्रामस्य मायामतीत्य गन्तुं नाशक्नोत्। अदः पश्यसि मातः क्षुद्ररथ्यायाः प्रान्ते, दैनिकं कर्म निष्पाद्य गृहाभिमुखं जनस्रोतः प्रवहति, परममुं दशद्वादशहस्तां भूमिमन्तरेण तैः सह गन्तुं पुनर्नास्त्यल्पीयानपि पन्थाः। एवं कृत्वा अस्यामेव सायंसन्ध्यायां तत्रापि प्रतीपगामि जनस्रोतो भवनाभिमुखं प्रवहद् दृष्टम्। किन्तु मातः, तस्य प्रत्येकं गवां वत्सानां गोष्ठानाञ्च परिचयमजानाम्। उक्त्वाऽतिगभीरं श्वासमेकं हृदयाद्विमोच्य नीरवतामगृह्णान् सः। यं ग्राममेकदा स परित्यज्यागतवान्, इयतां सुखैश्वर्याणामन्तरालेऽपि तस्यैव कृते तस्यान्तरिन्द्रियं यद्रूददासीत, तदिदं यदा तदैव विजययाऽनुभूतम्। तथापि दिनमेकमपि सैतस्य कारणं नालोचितवती, परमद्य विलासमहोदये तस्यां दिशि तस्या दृष्टिमाकृष्य प्रस्थिते परेतस्य पितुर्वाक्यपरम्पराः स्मरन्त्यास्तस्या मनसि पितुः प्रच्छन्नस्य दुःखस्य हेतुरकस्मादेकदैव प्रोद्भासित आसीत्। महत्यस्मिन् कलिकातायां जनारण्येऽपि तत्रभवान् कथम्भूतमसहायं जीवनमयापयत, अद्य सा उपनेत्रं तदवलोक्य एकपदे भीतासीत्। आश्चर्यञ्चैतत्, येन ग्रामेण—यया वास्तुभूम्या साकं तस्या जन्मनः प्रभृति परिचयो नास्ति तावेवाद्य तां दुर्निवारया शक्त्या समाकर्षन्तावास्ताम्।

———

अभिनन्दनायोजनम्

मान्या महानुभावाः !

वैदिकवाङ्मयस्य सर्वाग्रगण्यविदुषाम्, समर्थसमीक्षकाणाम्, मार्मिकगवेषकाणां च जयपुरराजसभाप्रधानपण्डित-विद्यावाचस्पतिश्रीमधुसूदनशर्ममहाभागानां शुभमभिधानं नास्त्यविदितं संस्कृतविदुषाम्। महाभागैरेभिरासन्नचत्वारिंशैर्वर्षैरनवरतं परिश्राम्यद्भिर्वैदिकविज्ञानस्य तत्तासां ग्रन्थीनां शिथिलीकाराय फलेग्रहिः प्रयत्नः समनुष्ठितः। येषां वैदिकविषयाणां संगतिप्रदर्शनमपि महामहतां विदुषामपि कठिनतममासीत्, तेषां गूढतमं मर्म पण्डितमहोदयैः प्राकाश्यमुपनीतम्। अनेकाभ्यः शताब्दीभ्यो विलुप्तस्यास्य विज्ञानस्य प्रकाशने विवेचने चैभिस्तथा पराक्रान्तम्, यथा कार्यमिदमागामिन्याः सन्ततेः पथिप्रदर्शकतामुपैष्यति, विंश्याः शताब्द्याः ख्यातततमेषु जगन्मान्येषु वैज्ञानिकविद्वत्सु च शिरो भारतीयानामुन्नमयिष्यतीत्यत्रैतदीयकार्यपरिपाटीपरिचितानां नोदेति संशयलेशोऽपि। शताधिका ग्रन्थाः संस्कृतवाङ्मये महाभागैरेभिर्ग्रथिताः, ये न केवलमेषाम्, अपि तु शताब्द्या अस्या गौरवं चिराय प्रतिष्ठापयिष्यन्ति।

सौभाग्यमिदमस्माकं संस्कृतवाङ्मयसेवाजुषाम्, यदिदानीं श्रीमन्त इमे स्वजन्मनः सप्ततितमे वत्सरे कृतपदाः। हिन्दीसाहित्यसेवकानां बहूनां विशिष्टविदुषामेतावद्वयःप्राप्तावभिनन्दनायोजनं महता समारोहेण यथा हिन्दीसाहित्यसेवकैः समनुष्ठितम्, तथा संस्कृतसाहित्यसेविषु प्रथमगणनीयानामेषां महानुभावानामभिनन्दनायोजनं संस्कृतसाहित्यसंमेलनेनोपक्रान्तम्। अस्मिन्नेव चैत्रमासे जयपुर एवाभिनन्दनं संपाद्येत, तदर्थमत्र बहोः कालात् संघटिता श्रीमधुसूदनाभिनन्दनसमितिः। एष च कार्यक्रमः समित्या निर्धारितः—

(१) जयपुरात्प्रकाश्यमानस्य संस्कृतसाहित्यसंमेलनमुखपत्रस्य संस्कृत-

रत्नाकरस्य विशेषाङ्कः "वेदाङ्क"नाम्ना तस्मिन्नवसरे प्रकाश्य महाभागेभ्य एभ्यः समर्पणीयः। अस्मिन् महाविदुषां वैदिकसम्प्रदायाचार्याणाम्, ख्याततमानां च भारतीयविद्वत्प्रवराणां निबन्धाः प्रकाशयिष्यन्ते; श्रीमधुसूदनझामहाभागानां जीवनेतिवृत्तम्, कृतिपरिचयश्चापि विदुषां परिचयाय तत्र प्रकाश्येत।

(२) वैदिके, दार्शनिके, सामान्ये च विषये स्पर्धारूपेण सर्वप्रान्तीयविद्वद्भिर्निबन्धा लेखयिष्यन्ते, ते चाभिनन्दनसंमेलनावसरे पाठयिष्यन्ते। भारते ख्यातनामानो विद्वत्प्रवरा अत्र निर्णायकाः स्युः। तन्निर्णयानुसारं येषां निबन्धाः प्राथम्यं भजेयुस्ते सदसि संमानपत्रेण, समुचितदक्षिणासहितेन महार्ध्यवस्त्रेणोपायनेन च सत्क्रियेरन्। निबन्धलेखनार्थमिमे विषयाः समित्या निर्धारिताः।

(क) वैदिको विषयः—वैदिक्यो देवताः

(ख) दार्शनिको विषयः—ईश्वरवादः

(ग) सामान्यो विषयः—साम्प्रतं वैदिकपद्धतिप्रचारोपायाः।

एषु विषयेषु यथेच्छं कस्मिंश्चिद् विषये भाषया विषयेण च प्रौढं संस्कृतभाषामयं निबन्धं विलिख्य चैत्र-शुक्ल-पञ्चमीं यावद्ये विद्वांसोऽभिनन्दनसमितिमन्त्रिसविधे प्रापयिष्यन्ति, नियते च संमेलनावसरे (चैत्रशुक्ले ११, १२, १३ तिथिषु) जयपुरे स्वयमुपस्थाय स्वीयं निबन्धं श्रावयिष्यन्ति, तेषामेव निबन्धाः प्रतियोगितापरीक्षायां गृहीताः स्युः।

(३) "सुरभारती" इतिविषयमधिकृत्य दशभ्योऽन्यूनानि विंशतेश्चानधिकानि सरल-प्रौढानि पद्यानि विरचय्य ये चैत्रकृष्णामापर्यन्तमभिनन्दनसमितिमन्त्रिसविधे प्रापयिष्यन्ति, तेषामपि प्रतियोगितापरीक्षायां सन्निवेशः स्यात्। अत्र च येषां काव्यं प्रथमगणनीयं निर्णायकैर्निर्धार्येत, ते सुवर्णपदकसंमानेन सत्क्रियेरन्

(४) प्रतियोगितापरीक्षायां ये न प्रवेष्टुमिच्छन्ति, तेषां महतां विदुषां

स्वातन्त्र्येण संस्कृतभाषामयी, हिन्दीभाषामयी, इङ्गिलशभाषामयी वा वक्तृता, निबन्धपाठः, कविसंमेलनं चापि कार्यक्रमे निर्धारितानि। निबन्धार्थं वक्तृतार्थं च "वैदिकवाङ्मये वैशिष्ट्यम्" "भारतीयानां पाश्चात्यानां च वैदिकतत्त्वगवेषणा" "भारतीयेषु शास्त्रेषु विज्ञानम्" "भारतीयानां दर्शनानि" "दर्शनेषु सिद्धान्तभेदस्तदैक्यं वा" इति विषया निर्धारिताः सन्ति। एवंजातीयक एतेभ्योऽतिरिक्तेऽपि विषये शक्यं विद्वद्भिर्व्याख्यातुम्। कविसंमेलनार्थं च निम्ननिर्दिष्टा समस्या नियता—

'सन्ति सन्तः कियन्तः'

पद्यत्रितयादधिकं चैकस्य कविमहाभागस्य न गृह्येत। निबन्ध–वक्तृता-कवित्वाद्यर्थं भारते ख्यातनामानः पण्डिताः प्रार्थ्यन्ते।

(५) प्राक्तनीं परिपाटीं परिष्कृतामवलम्ब्य प्रौढानां छात्राणां व्याकरण-नव्यन्याय-धर्मशास्त्र-दर्शन-विषयेषु जल्पकथा अपि भविष्यन्ति। तत्र विशेषेण स्वीयां प्रौढिं प्रकटितवन्तश्च छात्राः समुचितेन पारितोषिकेण प्रोत्साह्येरन्। अत्र प्रवेशमभिलष्यद्भिरपि स्वीयं नाम फाल्गुन्याः पूर्णिमातः प्रागेव मन्त्रिणे सूचनीयम्। स्वीयं छात्रत्वं तत्तत्पाठशालाध्यक्षपत्रेण, स्वनगरविशिष्टविद्वत्पत्रेण वा प्रमाणीकरणीयम्, कस्मिन् शास्त्रे जल्पं विधातुमभिवाञ्छतीत्यपि च निवेद्यम्। प्राप्ते नामनि तत्तच्छास्त्रीयो वाद-विषयस्तस्मै पूर्वमेव पत्रद्वारेण प्रबोध्येत।

किञ्चास्मिन्नवसरे समवेता विद्वांसो महाभागाः श्रीमधुसूदनझामहाभागैरुपक्रान्तमिदं वैदिकतत्त्वान्वेषणकार्यं कथं स्थैर्यमासादयेदित्यपि विचारयिष्यन्ति। तदिदं सादरं निवेद्यते—यत् कालेऽस्मिन्संस्कृतोन्नतिकामुकैः, संस्कृतविद्वत्सु कालोपयुक्तानि जीवनचिह्नानि प्रदर्शयितुमभिवाञ्छद्भिश्च विद्वन्महाभागैः कार्येऽस्मिन सहयोगः सर्वात्मना विधेयः। प्रचुरविदुषां सहयोगेनैव कार्यसाफल्यं संभाव्यते।

तत्तत्पाठशालाकालेजाद्यध्यक्षमहाभागैश्च पत्रमिदं स्वीयपाठशालाध्याप-

केषु प्रौढच्छात्रेषु चावश्यं कृपया प्रचारणीयम् । सर्वैरेव च विद्वद्भिः स्वेष्ट-सुहृदो वृत्तेनानेन परिचिताः कार्याः, येन ते समये प्रतियोगित्वाय निबन्धकवितादिकं प्रेषयितुं प्रभवेयुरिति ।

निवेदकौ—

वैद्यरत्नलक्ष्मीरामस्वामी भिषगाचार्यः (अभिनन्दनसमितिसभापतिः)

म. म. गिरिधरशर्मा चतुर्वेदः (मन्त्री)

संस्कृतकालेज जयपुर सिटी
(राजपूताना)

शोकगीतिः (Elegy)

[निबन्धकः—श्रीहरिदास-काव्यस्मृतितीर्थः]

The curfew tolls the knell of parting day,
The lowing herd winds slowly o'er the lea,
The ploughman homeward plods his weary way.
And leaves the world to darkness and to me.

सान्ध्यो घण्टाध्वनिरनिभृतो मन्दिरादागतः सन्
गोधूल्याख्यः समय इतवाञ्ज्ञापयत्यादरेण ।
धेनूर्मन्दं चलति ससुता क्षेत्रतः स्वीयगोष्ठं
क्षिप्त्वा चैतं तमसि कृषको मामहो याति गेहम् ॥

Now fades the glimmering landscape on the sight,
And all the air a solemn stillness holds,
Save where the beetle wheels his dronin gflight,
And drowsy tinklings lull the distant folds :

क्षीणालोके प्रसरति न वै दृष्टिरेषा मदीया
लीनाः सर्वे प्रकृतिविषया नीरवा निद्रिताश्च ।
झिल्लीरावः श्रुतिपरिगतो नापि घण्टाध्वनिर्वा
निद्राणस्य प्रभवति पशोः सुप्तिविद्रावणाय ॥

———

अजयपालकृतो

नानार्थसंग्रहः

पूर्वानुवृत्तिः

पद्मोऽम्बुजे च संख्याने नागे ना च प्रकीर्त्तितः ।
पद्मं द्विरदबिन्दौ च **पद्मा** भार्गी-श्रियोरपि ॥३७६॥
परिग्रहः कलत्रे च मूलस्वीकारयोरपि ।
शपथे परिवारे च राहुवक्त्रस्थभास्करे ॥३७७॥
पदं भवे परित्राणे व्यवसाये* च कीर्त्तितम् ।
वाक्ये वस्तुनि शब्दे च दिग्गजेन्तुप्रभेदयोः ॥३७८॥
पुष्करं हस्तिहस्ताग्रे तीर्थ-भेषजभेदयोः ।
व्योम्नि खड्गफले पद्मे तूर्यवक्त्रे जलेऽपि च ॥२७९॥
[**प्रकृति**... ... ...]
स्वभावे पङ्कजे चैव पौरामात्यादियोनिषु ॥३८०॥
सत्त्वरजस्तमःसाम्ये प्रत्ययात् प्रथमे तथा ।
पूर्णानकं पूर्णपात्रं वलयस्त्रीफयज्जितम् (?) ॥३८१॥
यत्र तत्र यथासंख्यं **पूर्णं** पटह-पात्रयोः ।
प्राक् प्रत्यग् द्वितयं देशे दिशि कालेऽव्ययं स्मृतम् ॥३८२॥
प्राच्ये चैव प्रतीच्ये च वर्त्तमाने त्वनव्ययम् ।
†**पादो**ऽङ्घ्रौ च तुरीयांशे गिरेः प्रत्यन्तपर्वते ॥३८३॥
दीधितौ तरुमूले [च] **पुराख्या** गुग्गुलौ पुरि ।
पौरुषेयं भवेत् कार्ये पादान्तरेष्वपि क्वचित् ॥३८४॥

---

* व्यवसायाच—आ † पद—आ

प्रदोषोऽपि निशाद्यायां कदाचिद् रात्रिमात्रके ।
प्रभवा जन्महेतौ स्यात् पयोमूले पराक्रमे ॥३८५॥
आद्योपलब्धये स्थाने* पाकश्चिह्नलक्षणम् (?) ।
प्लवो भेके कूपे भेले शब्दे च श्वपचे† प्लुतौ ॥३८६॥
‡क्रमनिम्नमहीभागे पक्षिभेदे जलोत्तरे [जलान्तरे ?] ।
भवेत् **परिकरो** वृन्दे परिवार-विवेकयोः ॥३८७॥
प्रारम्भ-गात्रिकाबन्ध-पर्यङ्केषु परिच्छदे ।
प्रसवः शाखिनां पुष्पे फलेऽथ गर्भमोचने ॥३८८॥
परम्पराप्रसङ्गे च जनना-पत्ययोरपि ।
पणो विक्रय्यशाकादिमुष्टौ द्यूते भृतौ ग्लहे ॥३८९॥
व्यवहारे §पुराणेऽर्थे मूल्ये गण्डकविंशतौ ।
पक्षः सख्यौ बले साध्ये करिपार्श्व-विरोधयोः ॥३९०॥
गरुत्-सहाययोश्चुल्लीरन्ध्रे केशात् परश्चये ।
प्रतिग्रहः क्रियाकारे सैन्यपृष्ठे पतद्ग्रहे ॥३९१॥
द्विजदेयग्रहे तस्य स्वीकारे च प्रयुज्यते ।
पुण्डरीकं सितच्छत्रे सिताम्भोजे च कीर्त्तितम् ॥३९२॥
पुण्डरीको व्याघ्रभेदे §§पाकः पचनडिम्भयोः ।
पक्ष्म सूत्रे च सूक्ष्मांशे नेत्रलोमनि वर्त्तते ॥३९३॥
दृष्टं पुष्पच्छदे वापि **प्रतिघा** रोष-घातयोः ।
प्रग्रहो भासि योक्त्रे च बन्द्याश्च नियमे तथा ॥३९४॥
तुलासूत्रे सुवर्णालौ **प्रतीको**ऽङ्ग-प्रतीकयोः ।
भवेत् **प्रतिसरः** सूत्रे व्रणशुद्धौ चमूकटौ ॥३९५॥

---

* आद्योपलब्धायेष्टौ—आ
† प्लवो भेके कपो भेगालर्धश्च पवें प्लुतौ—आ
‡ प्लवनिम्ने
§ पुराण—कार्षापण।
§§ पचनं पाकडिम्भयोः—आ

मण्डलारत्नयोः प्रैष्ये प्रकाशः स्फुट-रोचिषोः ।
प्रमाणं कारणे माने शास्त्रे सत्यप्रवक्तरि ॥३६६॥
मर्यादायां तथा नित्ये पर्णाख्या किंशुके दले ।
*पालिः श्रोतलतायां स्यात् प्रदेशे पङ्क्ति-चिह्नयोः ॥३६७॥
†दृष्टश्मश्रुस्त्रियामस्त्रौ पर्यायोऽवसरे क्रमे ।
पर्व प्रतिपत्पक्षान्तसन्धौ विषुवदादिके ॥३६८॥
ग्रन्थिप्रस्तावयोश्चापि प्रीतिः प्रेम-प्रमोदयोः ।
‡कुरङ्गे च प्रपौत्रे च तनये[ऽपि] निगद्यते ॥३६९॥
परम्परा सन्तानेऽपि पङ्कः पापे च कर्दमे ।
पाशः कर्णादिहेम्नि स्यात् समूहे केशपूर्वकः ॥४००॥
खड्गादिवन्धने चापि प्रसूनं कुसुमे फले ।
परागः पुष्परेणौ स्यात् पानीय-रजसोरपि ॥४०१॥
प्रतीतः प्रथिते दृष्टो हृष्टज्ञानमनीषिषु ।
पौरुषं नृभुजोन्माने पुंसो भावे च कर्मणि ॥४०२॥
परिवेशो रवेर्बिम्बे मण्डले वेष्टने तथा ।
पिप्पल्याख्या §सलिले च वृक्ष[वस्त्र]च्छेदविशेषयोः ॥४०३॥
प्रकरः स्तवके पुष्पे समूहेऽपि प्रयुज्यते ।
पार्ष्णिरुन्मत्तयोषायां सैन्यपृष्ठाङ्घ्रिमूलयोः ॥४०४॥
पिणाकः स्याद्रजोवर्षे शम्भोर्धन्वनि शूलके ।
पाचनो रन्धनद्रव्ये पाचनं पाचने मतम् ॥४०५॥
पातनी रन्धनस्थाल्यां वागुरायामपि क्वचित् ।
पतङ्गः शलभे सूर्ये शालिभेदे च पक्षिणि ॥४०६॥

---

* प्रमाणच्च लतायां—आ

† दृष्टं श्मश्रु स्त्रियामस्त्री—आ

‡ कदाचित् "प्रतिनप्ता प्रपौत्रे च" इति वा "अनङ्गस्य कलत्रे च योगभेदे निगद्यते" इति वा स्यात्।

§ वस्त्रवृक्षभेदच्छेदविशेषयोः—आ

*प्रसूतिः प्रसूते† पुत्रे तनयायामपि स्मृता ।
पवनं कुम्भकृत्पाकस्थाने स्यात् पवनोऽनिले ॥४०७॥
पक्षतिस्तु गरुन्मूले तथा प्रतिपदि स्मृता ।
पर्याप्तं यथेष्टे शक्ते तृप्तौ निवारणे तथा ॥४०८॥
पटुस्तीक्ष्णे स्फुटे दक्षे पटोले निष्ठुरारुजोः ।
परीष्टिः परिचर्यायां दृश्यते च गवेषणे ॥४०९॥
प्रदरो रोगभेदे स्याद् विदारे बाण-भङ्गयोः ।
पुलकस्तुच्छधान्ये स्यात् संक्षेपे भक्तसिक्थके ॥४१०॥
‡पललं तिलमिश्रे च पिशिते कर्दमान्तरे ।
परिवारः परिजने दृष्टः खड्गपिधानके ॥४११॥
§पक्को विनाशाऽभिमुखे जने परिणते [त्रिषु] ।
पक्षचर एकचरे यूथभ्रष्टे विहङ्गमे ॥४१२॥
पादपः पादपीठेऽपि तरौ पादरथे तथा ।
पीलुः पुष्पे गजे वृक्षे काण्डे तालास्थिखण्डके ॥४१३॥
प्रेतः परेतो ना मृते [तथा] भूतान्तरेऽपि च ।
प्रतिश्रयः सभायां स्यादाश्रये मन्दिरेऽपि च ॥४१४॥
पिण्डमाजीवने देवे निवापे गोलके तथा ।
प्रायो मरणबाहुल्यतुल्येष्वनशनेऽपि च ॥४१५॥
परिवापो जलस्थाने स्यादावापे¶ परिच्छदे ।
पल्लवो विटपे** षिड्गे पात्रे किशलये तथा ॥४१६॥
परिघो मुद्गरेऽस्त्रे च कथ्यते शूल-घातयोः ।
पुरस्कृतोऽतिशस्ते च पूजिते चाग्रतः कृते ॥४१७॥

---

* प्रसूतः—श्रा
† प्रसूते—उत्पादे
‡ पुलकित चित्तवृत्ते च पिशितं कर्दमान्तरे—श्रा
§ पक्की विलासेऽभिमुखे—श्रा
¶ स्याप्यजीवे—श्रा
** विस्तरे—श्रा

प्रसिद्धः प्रजव-ख्यात-कृतप्रसाधनेषु च ।
प्रणीतः संस्कृताग्नौ स्याद् विहितेऽपि प्रवेशिते ॥४१८॥
पुलकः कृमि-रोमाञ्च-प्रस्तरेषु प्रयुज्यते ।
पटलध्वनि पिटके नेत्ररोगसमूहयोः ॥४१९॥
प्रियकः कदम्बफल्यां पीतसाले मृगान्तरे ।
प्रकाण्डो विटपे शस्त्रे तरुशाखाशिफान्तरे ॥४२०॥
पृषच्च पृषतो बिन्दौ प्रायश्चित्ते प्रयुज्यते ।
प्रवणं क्रमनिम्ने च प्रह्वे चतुष्पथेऽपि च ॥४२१॥
प्रकोष्ठः कूर्परान्नीचे कक्षायामपि दृश्यते ।
प्रघनोऽपि बहिर्द्वारेऽलिन्दके लोहमुद्गरे ॥४२२॥
पाटला गवि पुष्पे च पाटलो व्रीहि-वर्णयोः ।
परिभाषणञ्च नियमे निन्दोपालम्भवाक्ययोः ॥४२३॥
प्रग्रहस्तु तुलासूत्रे* रश्मावपि च वाजिनाम् ।
पेचकः करिलाङ्गूलमूल-कौशिकयोरपि ॥४२४॥
प्रतियत्नस्तु संस्कारे तथोपग्रन्थ-लिप्सयोः ।
पत्तिः सैन्यप्रभेदे स्यात् पदातौ गमने तथा ॥४२५॥
प्रणयः प्रेम-विश्रम्भ-याच्ञासु च प्रकीर्त्तितः ।
प्रथमं प्रमुखं चादौ प्रधाने परिकीर्त्तितम् ॥४२६॥
पारायणं भवेत् कार्त्स्न्ये समासङ्गेऽपि कीर्त्तितम् ।
परिबर्हो नृपार्हे स्याद् दृश्यते च परिच्छदे ॥४२७॥
पार्श्वं चावयवे जन्तोर्वक्रोपाये च कीर्त्तितम् ।
पराख्या केवले श्रेष्ठे रिपौ योग्ये स्वतोऽन्यतः ॥४२८॥
भवेत् प्रतिकृतिः ख्यातौ प्रतिमा-प्रतिकारयोः ।
अस्ति प्रतिहतो द्विष्ट-प्रतिस्खलितयोरपि ॥४२९॥

---

* प्रतिग्रहस्तुलासूत्रे—श्रा

भवेत् **पिप्पलकं** स्यूतिसूत्रे च स्तनचूचुके ।
पलाशाख्या हरिद्रक्षःशठीषु† किंशुके दले ॥४३०॥
भवेत् **प्रणिहितं** प्राप्ते न्यस्ते चापि समाहिते ।
प्लवङ्गमः प्लवङ्गश्च मतो वानर-भेकयोः ॥४३१॥
परमं स्वीकरेऽसंख्यं **परमस्तु** परेऽपि च ।
प्रतिमानं प्रतिमेभदन्तद्वितयमध्ययोः ॥४३२॥
भवेत् **प्रवचनीयाख्या** प्रवाक्ये च प्रवक्तरि ।
प्रासादो विबुधावासे निवासे च महीभुजाम् ॥४३३॥
भवेत् **प्रवचनं** वेदे कल्याणभाषिते मतम् ।
पिण्याकः सिह्लके दृष्टस्तिलकल्के च कुत्रचित् ॥४३४॥
पराक्रमः समुद्योगे प्राणमात्रे च दृश्यते ।
पराभवः परिभवे नाशेऽपि परिकीर्त्तितः ॥४३५॥
प्रलयो मृत्यु-संवर्त्त-मूर्च्छासु परिकीर्त्तितः ।
प्रणाय्यो लोभनिर्मुक्ते स्यादसम्मत एव च ॥४३६॥
भवेत् **परिमलः** ख्यातौ गन्धे जनमनोहरे ।
प्रतिष्कषः सहाये च वार्त्ताहारे पुरोगमे ॥४३७॥
पितसन् पिपतिषन्तुभौ पतनेच्छु-विहङ्गयोः ।
पूर्वस्तु पूर्वपुरुषपुरस्तादग्रजेष्वपि ॥४३८॥
पिशुना मता स्पृक्कायां **पिशुनः** सूचके खले ।
पुरस्तु गुग्गुलौ दृष्टः **पुरं** पूर्देहरश्मिषु ॥४३९॥
पवित्रं यज्ञोपवीते कुशे पूते च दृश्यते ।
प्रतिपादनं प्रतिपन्ने **पटो रोमपटे** मृगे ॥४४०॥
पतिः प्रभौ गतौ मूले **पारावतः** खगे मृगे ।
पुष्टो रोमणि पाषाणे **पामरः** खल-नीचयोः ॥४४१॥

† हरिद्राक्षषष्ठीषु—श्रा

पारदः क्षपणी-गुर्वोः पार्थिवो भुवने नृपे ।
प्रवेणी तु कुथे वेण्यां पुद्गलश्चाऽऽत्म-देहयोः ॥४४२॥
प्रगाढं कठिने कृच्छ्रे * प्रवापो देह-वेश्मनोः ।
प्लक्षो जट्यां गर्द्दभाण्डे पोतः शिशु-वहित्रयोः ॥४४३॥
पद्धतिः पथि पङ्क्तौ स्यात् पूर्वश्च खण्ड-साध्ययोः ।
प्रतिष्ठा यशसि स्थाने पत्री श्येने खगे शरे ॥४४४॥
प्राणो वायौ वने जीवे पुङ्गवो वृषभे वरे ।
प्रज्ञः प्राज्ञे स्त्रियां बुद्धौ पिण्डितं गलिते घने ॥४४५॥
पृथग्जनोऽधमे मूर्खे पृथुकश्चिपिटेऽर्भके ।
पुरुषो नाथतुङ्गेषु पटः पियाल-वस्त्रयोः ॥४४६॥
पयोधरः स्त्रीस्तनेऽब्दे पयः क्षीरे तथाऽम्भसि ।
प्रयोजनं योग-हेत्वोः प्रेम स्निग्धत्व-नर्मणोः ॥४४७॥
पक्तिः स्याद् गौरवे पाके प्रतिपत् तिथि-संविदोः ।
प्रतीहारो द्वाःस्थ-द्वारोः प्रेक्षा धीर्नृत्यदर्शयोः ॥४४८॥
प्रस्थः सानुनि माने च प्रततिस्तति-वीरुधोः ।
पत्रं पक्षे दले युग्ये प्रार्थितं याचिते हते ॥४४९॥
प्रपञ्चो विस्तरे दम्भे पातालं क्ष्मातलौर्वयोः ।
प्रकारो भेद-सदृशोः प्रियङ्गुः कङ्गु-वृक्षयोः ॥४५०॥
†प्रहतं क्षुण्णे वितते प्राप्तिर्लाभे तथोदये ।
प्रविदारणं भिदाज्योः पीतिः पान-तुरङ्गयोः ॥४५१॥
प्रज्ञानं धी-लक्षणयोः पूगः क्रमुक-वृन्दयोः ।
प्रवृत्तिर्वृत्तौ वार्त्तायां पुरुषो मनुजात्मनोः ॥४५२॥
पुष्पं प्रसून-रजसोः पेशलं चारु-दक्षयोः ।
प्रोक्षणं तु वधे सेके प्रैष्यः प्रेषण-पीडयोः ॥४५३॥

---

* प्रविणी कृत्स्ने—श्रा † प्रभूतं प्रचुरं न्यूने—श्रा

प्रसूरश्व-जनन्योश्च प्रणिधिः प्रार्थने चरे ।
प्रश्रयः प्रणये वेगे प्राप्तौ लब्धे समञ्जसे ॥४५४॥
पिचिण्डः कुक्षौ पश्वङ्गे पोत्रं कोलाहलास्ययोः ।
पिङ्गः क्लिन्नदृक्-क्लिन्नाक्षणोः पुष्यो मासर्क्षयोः स्मृतः ॥४५५॥
पलं माने च मांसे च पलाशी राक्षसे द्रुमे ।
*प्लक्षः पिप्पल-पर्कट्योः पार्थिवो भूभवे नृपे ॥४५६॥
प्राप्तरूपोऽभिरूपे च पल्लिर्ग्राम-निवासयोः ।
पर्य्युपोपर्युपर्यन्तः पूजा सम्मान-लोकयोः ॥४५७
प्रत्याभिमुख्ये वीप्सायां लक्षण-प्रतिदानयोः ।
इत्थम्भूतस्य †चाख्याने मात्रार्थे तुल्य-भागयोः ॥४५८॥
पुरा प्रबन्ध-निकट-चिरन्तनेष्वनागते ।
पूर्वेद्युः पूर्वदिवस-प्रत्यूषयोरुदाहृतम् ॥४५९॥
पुरस्तात प्रथमे प्राच्यां पुरार्थे च पुरस्तथा ।
पुनरप्रथमे भेदे प्राक् तुल्येऽन्तर-पूर्वयोः ॥४६०॥
पश्चात प्रतीच्यां चरमे प्रादुः स्फुटे च सम्भवे ।

[फ]

फलं लाभे फलोऽस्त्रांगे व्युष्टौ हेतूत्थसम्पदोः ॥४६१।
फली च फलके वृक्षे प्रियङ्गु-मत्स्यभेदयोः ।
फेनिलं फेनसंयुक्ते बदरी-विटयोरपि ॥४६२॥
फालः स्यात् कृषके फाले फल्गु रेणु-विसारयोः ।

ब

बलो रामेऽसुरे काके बला वाट्यालके बलम् ॥४६३॥
स्थौल्ये शक्तौ तथा रूपे पृतनायां बलान्विते ।
बहुलः कृष्णपक्षेऽग्नौ मेचके बहुलं द्वयोः‡ ॥४६४॥

---

* पुच्छस्य पिलुपर्कटोः—आ   † उग्रे हतस्य—आ   ‡ बहुनि पयोः—आ

बहुला त्रुटि*-माहेयी-कृत्तिकासु प्रकीर्त्तिता ।
बलिः करे दैत्यभेदे पूजायां गृहदारुणि ॥४६५॥
जठरावयवे चापि जराशिथिलचर्मणि ।
बालिका वालूकायान्तु कुमार्यां कर्णभूषणे ॥४६६॥
बालकं कटके दृष्टमङ्गुलीयेऽपि कुत्रचित् ।
वृत्तं छन्दसि वृत्तौ च निस्तलातीतयोरपि ॥४६७॥
दृढाधीतचरित्रेषु बल्लभाऽध्यक्ष-कान्तयोः ।
बडवा कुम्भदास्यां स्यादश्वायां योषिदन्तरे ॥४६८॥
वारवाणिर्धर्माध्यक्षे भवेत् संवत्सरे क्वचित् ।
बाहुजः क्षत्रिये दृष्टो गृहासक्तशुके क्वचित् ॥४६९॥
बभ्रुः स्यान्नकुले पिङ्गे विपुले गरुडध्वजे ।
बलजा क्षेत्रे मत्स्ये च पुरद्वार-स्त्रियोर्मता ॥४७०॥
बन्धुलं बन्धुलीनम्र सुन्दरेऽपि प्रयुज्यते ।
बाणिनी तु विदग्धायां नर्त्तकी-मत्तयोषितोः ॥४७१॥
बिटपः पल्लव-स्तम्ब-शाखासु विटनायके ।
बालो डिम्बार्भकेशेषु ह्रीबेरे श्वेतवालधौ ॥४७२॥
बाणो दानवभेदे तु शरे बाणं फलेऽपि च ।
बेला कालेऽब्धिकूले च मर्यादाम्बुविकारयोः ॥४७३॥
बृहती क्षुद्रवार्त्ताकी-छन्दः-क्षुद्रात्रासनवरादिषु ।
बत्सं वक्षसि बत्सस्तु तर्ण-वर्ष-सुतादिषु ॥४७४॥
बीभत्सो विकृते पापे क्रूरे पापि-घृणात्मनोः ।
बराटकः सरोजस्य बीजकोषे कपर्दके ॥४७५॥
ब्रह्म वेदात्मतपःसु ब्रह्मा विप्रे प्रजापतौ ।
द्वादशाङ्गुले बितस्तिः स्यात् प्रशान्तेऽङ्कुशकर्मणि ॥४७६॥

* एला

वल्गुकं रुचिरे दृष्टं चन्दने विपिने पणे ।
ब्राह्मण्यं ब्रह्मणो भावे ब्रह्मविद् वेदवित्तरि ॥४७७॥
मुखे चाव्यवहारे च विप्रे च भाषिताप्तयोः ।

[भ]

भाण्डं मूलधने पात्रे भण्डवृत्तौ प्रकीर्तितम् ॥४७८॥
भिन्नं विदारिते दृष्टं व्यतिरिक्ते च मिश्रिते ।
भुजिष्यः स्यादनायत्ते प्रेष्ये च हस्त-खातयोः ॥४७९॥
भंगा शणतृणे* भङ्गो मेद-वीच्योः† पराजये ।
भारः सहस्रद्वितये पलानां चापि वीवधे ॥४८०॥
भूजम्बुरपि गोधूमे वैकंकतफले तथा ।
भंडनं कवचे युद्धे खलीकारे च दृश्यते ॥४८१॥
भेदो विदारणे दृष्ट उपजाप-विशेषयोः ।
भिक्षा सेवा-प्रार्थनयोर्भृतौ भिक्षितवस्तुनि ॥४८२॥
भृङ्गमुक्तादिभृङ्गश्च धूम्याटे षट्पदेऽपि च ।
भागधेयः करे भाग्ये दायादेऽपि च दृश्यते ॥४८३॥
भवो भद्राप्तिसत्तासु शिव-संस्कार-जन्मसु ।
भोगवती तु नागानां नगर्यां च प्रकीर्त्तिता ॥४८४॥
[भद्राख्या............]
रास्नायां भद्रवर्षे तु समाधौ च गजे शुभे ।
भूयोऽव्ययं पुनरर्थे भूयान् बहुतरे मतः ॥४८५॥
भव्यं योग्ये च कल्याणे भाविन्यपि श्रुतं क्वचित् ।
भङ्गः पराजये दम्भे गमने जलनिर्गमे ॥४८६॥
भीमो वृकोदरे शम्भौ दृश्यते च भयानके ।
भवेद् भगवती गौर्यां भगवान् बुद्ध-पूज्ययोः ॥४८७॥

---

* गणश्रतने—श्रा०
† मेदवीर्यो—श्रा०

भूतिकं भूमिनिम्बे च यवान्यां च तृणे तथा ।
भुवनं पिष्टपे तोये भ्रूणः स्त्रीगर्भ-पोतयोः ॥४८८॥
भेलो दिवाकरे चन्द्रे भुजङ्गः षिड्ग-सर्पयोः ।
भ्रातृव्यो भ्रातृजे शत्रौ भ्रमरोऽलिनि कामुके ॥४८९॥
भूतात्मा तु विधौ देहे भक्तिर्भावे च सेवने ।
भूमिर्भूश्च क्षितौ स्थाने भरोऽतिशय-भारयोः ॥४९०॥
भीरुः शतावरी भीते भानुर्दिनकरे त्विषि ।
भागो भाग्य एकदेशे भेलः प्लवे च भीरुके ॥४९१॥
भित्तिः कुड्ये प्रदोषे च भूतिर्भस्मनि सम्पदि ।
भरणं वेतने भृत्ये भूभृद्भूपाल-शैलयोः ॥४९२॥
भूमिस्पृग् वैश्य-नरयोर्भर्त्ता स्वामिनि धारके ।
भूरि प्राये सुवर्णे च भर्म चामीकरे भृतौ ॥४९३॥

[म]

मध्यमा स्याद् दृष्टरजोनार्यां मध्याङ्गुलेऽपि च ।
मध्यमी हेतुमध्ये तु मध्यमाङ्गुलिगह्वरे ॥४९४॥
मात्रा परिच्छदे माने स्तोके कर्णविभूषणे ।
अक्षरावयवे द्रव्ये यात्रायां कालभेदके ॥४९५॥
मण्डलं ग्रामसन्दोहे परिधौ प्रतिबिम्बके ।
वृन्दे शुनि मृगे चापि बिम्बे द्वादशराजके ॥४९६॥
महावीरो मृगेन्द्रेऽपि तार्क्ष्ये शूरे मखाग्निषु ।
सुभटे रश्यो श्वेताश्वे प्रवरे खगे (?) ॥४९७॥
मत्सरः कृपणाढ्ये स्यात् परस्वे द्रोहकारिणि ।
महामुनिः कृपे काले मन्युर्दैन्ये क्रतौ क्रुधि ॥४९८॥
मधुर्दैत्यान्तरे चैत्रे मधुके सुरभौ मधु ।
क्षौद्रे पुष्परसे मद्ये मह उत्सव-तेजसोः ॥४९९॥

मन्दो मूढे च रोगार्त्ते स्वैरेऽभाग्ये शनैश्चरे ।
प्रलये द्विपभेदे च मरुः शैले च धन्वनि ॥५००॥
मणिर्दाले च मेढ्राङ्गे रत्ने चाजगलस्तने ।
मल्लिर्मत्स्यविशेषे च करङ्के च कपालके ॥५०१॥
मूर्द्धाभिषिक्तो राजन्ये प्रधाने पृथिवीपतौ ।
मन्थरः सूचके मन्दे तथा वैशाख-कोपयोः ॥५०२॥
महामात्रः समृद्धे तु हस्त्यारोहाधिपेऽपि च ।
मौलिः संयतकेशे च चूडामुकुटयोरपि ॥५०३॥
माधवोऽपि वसन्ते च राधेशे दृश्यते तथा ।
मदनाख्या स्मरे वृक्षे मधूच्छिष्ट-वसन्तयोः ॥५०४॥
मञ्जुलो रमणीये तु जलरङ्गविहङ्गमे ।
माणवको भवेद् बाले हारभेदे कुपूरुषे ॥५०५॥
मङ्गलम्भविके दृष्टं तथा लब्धानुरक्षणे ।
महालयस्तु वीहारे वीक्षिते परमात्मनि ॥५०६॥
मागधी पिप्पली-शुण्ठ्योर्बन्दियोषिति युज्यते ।
मृगः पशौ मार्गशीर्षे एणे यज्ञे भभेदयोः ॥५०७॥
मधुका मधुयष्टौ च मधुकः स्तुतिपाठके ।
माता तु गवि रेवत्यां सेनानी-पितृयोषितोः ॥५०८॥
मिथुनं यूथ-दम्पत्योर्मिथुनो राशिभेदतः ।
मूलं निजे शिफायां स्याद् ऋक्षभेदेऽपि सन्निधौ ॥५०९॥
मानं प्रसूतिप्रस्थादौ मानश्चित्तसमुन्नतिः ।
मार्गो गवेषणे मासभेदे मृगपदाध्वनोः ॥५१०॥
भवेन्मदकलो मत्तद्विपे मदास्फुटोदिते ।
महासेनो बाहुलेये महासेनापतावपि ॥५११॥
मेखला खड्गबन्धे स्यात् काञ्ची-भूभृन्नितम्बयोः ।
मेचको विदितः कृष्णे बर्हिणां बर्हिचन्द्रके ॥५१२॥

महिषी कृताभिषेकराजस्त्री-महिषस्त्रियोः ।
महाकालः स्यात् किम्पाके शङ्करे च मखान्तरे ॥५१३॥
मुखं मुख्ये च वक्त्रे स्यादादावुपाय एव च ।
मन्दारः पारिभद्रे स्याद्देवद्रुमार्कपर्णयोः ॥५१४॥
म्लिष्टं म्लानेऽप्यविस्पष्टे **माःशब्दो** मास-चन्द्रयोः ।
मिसिर्मांसी-शतपुष्प्योः **सन्मरुद्वायु**-दिवौकसोः ॥५१५॥
मर्यादा धारणा-सीम्नोर्**मातङ्गः** श्वपचे द्विपे ।
मैथुनं रतिसङ्गे च **मन्दिरं** नगरे गृहे ॥५१६॥
मलयः शैलेऽप्यारामे **मूर्छितो** मूढ-वृद्धयोः ।
मूल्यन्तु वेतने रम्ये **मूर्त्तिः** काठिन्य-काययोः ॥५१७॥
मृदुः स्यात् कोमलेऽतीक्ष्णे **मृतं** मृत्यौ च याचिते ।
मन्मथः कपिले कामे **मार्गणो** याचके शरे ॥५१८॥
मोचा शाल्मलि-कदल्योः **मधुरं** स्वादु-रम्ययोः ।
मण्डो रसाग्र एरण्डे **मध्यं** नाभ्यवलग्नयोः ॥५१९॥
महीस्तन्द्र्यामविद्यायां **मूढस्तु** तन्द्रिते जडे ।
मतिरार्ये च शाके च **मयूखः** कर-कीलयोः ॥५२०॥
माल्यं पुष्पे पुष्पदाम्नि **मुण्डो** मूर्द्धनि मुण्डिते ।
मोदको हर्षके खाद्ये **महद्** राज्य-विशालयोः ॥५२१॥
मकराङ्कः स्मरे सिन्धावव्ययं स्यादतः परम् ।
मिथस्त्वन्योन्य-रहसोर्**मुहुः** स्याच्च क्षणे क्षणे ॥५२२॥

[य]

युतकं यौतुके युक्ते चलनाग्रे च संशये ।
स्त्रीणां वस्त्रान्तरे चैव युगले वसनाञ्चले ॥५२३॥
योगो ध्याने जये लाभे युक्तौ विश्रब्धघातिनि ।
सङ्गे समुच्चये चापि युक्ते चैव गुरौ तथा ॥५२४॥

योजनगन्धा तु वैदेही-कस्तूरी-व्यासमातृषु ।
यातयामपदं जीर्णे परिभुक्तोज्झिते तथा ॥५२५॥
युगं युग्मे च सत्यादौ चतुर्हस्त-रथाङ्गयोः ।
यमो नित्यशरीरार्थकृते यमज-कालयोः ॥५२६॥
यष्टिः शस्त्रे मधूयष्ट्यां योनिराकर-गुह्ययोः ।
यादःपतिः पाशिन्यब्धौ युक्तं युक्ते तथा पृथक् ॥५२७॥
याजनं वर्त्तने क्षेपे यन्ता हस्तिप-सूतयोः ।
यागार्हे याजनीये च ययुरश्व-मखाश्वयोः ॥५२८॥
यतिः करे तापसे च यक्षः श्रीदे च गुह्यके ।
योगाभ्यासे योगोऽवं यात्रा याचने च वर्त्तने ॥५२९॥
यथाशब्दोऽव्ययं तुल्ये कथ्यते च निदर्शने ।
यावन्माने च साकल्ये सीमायां चावधारणे ॥५३०॥

[र]

रूपं श्लोके ग्रन्थावृत्तौ नाटकादि-स्वभावयोः ।
चक्षुर्ग्राह्ये पशौ शब्दे बालके सुन्दराकृतौ ॥५३१॥
रामो दाशरथौ चारौ जामदग्न्ये हलायुधे ।
पशुभेदे सिते श्यामे रामा योषिति दृश्यते ॥५३२॥
रसो वीर्ये द्रवे रागे शृङ्गारादौ च पारदे ।
तिक्तादौ देहधातौ च विषे स्वादे रसा भुवि ॥५३३॥
रथ्या पथि प्रतोल्याञ्च रथानामपि संहतौ ।
रथ्यमंशे रथस्यैव रथ्यो रथस्य वोढरि ॥५३४॥
रेवटः शूकरे वेणौ वातूल-विषवैद्ययोः ।
रेवटं दक्षिणावर्त्तशङ्खेऽपि परिकीर्त्तितम् ॥५३५॥
रजतं धवले रूप्ये शोणिते हृद-हारयोः ।
रोहितो लोहिते मत्स्यभेद-व्यक्तेन्द्रचापयोः ॥५३६॥

रङ्गो युद्धे विरागे च खले रङ्गं त्रिगुण्यपि ।
राका निशाकरे पूर्णे वीक्षितार्त्तव-कल्पयोः ॥५३७॥
रुचिर्भास्यनुरागे स्यादभिष्वङ्गेऽपि कुत्रचित् ।
रागसूत्रं तुलासूत्रे पट्टसूत्रेऽपि सम्मतम् ॥५३८॥
राजा परिवृढे भूपे क्षत्रिये शशलाञ्छने ।
रजोऽपि रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु ॥५३९॥
रोचना रक्तकह्लारे गोपिण्डे वरयोषिति ।
रङ्गमाता तु कुट्टिन्यां लाक्षायामपि दृश्यते ॥५४०॥
रसः केशरे बकुले नागपुष्पे च वेधके ।
*राजिका पङ्क्तौ राजसर्पयोरपि दृश्यते ॥५४१॥
रसनं निम्बने [शब्दने] स्वादे रसना काञ्चि-जिह्वयोः ।
रीतिर्दुग्धासुवर्णादिमले स्यात् पित्तले स्थितौ ॥५४२॥
रौहिषो लोहिततृणे मृग-मत्स्यविशेषयोः ।
राजी वीथ्यां मृगे मत्स्ये पद्मे राजोपजीविनि ॥५४३॥
रागः केशादिके रक्तमात्सर्यलोहितादिषु
रौहिणेयः प्रलम्बघ्ने तन्तुके चन्द्रनन्दने ॥५४४॥
रोषणो रोषणे हेमघर्षणाश्मनि पारदे ।
रेवती गवि नक्षत्रे बलभद्रस्य योषिति ॥५४५॥
रोदसी रोदसा सार्द्धं पृथ्व्यां स्वर्गे दिवि क्षितौ ।
रतर्द्धिकं सुखस्नानदिनेऽष्टमङ्गले तथा ॥५४६॥
रूप्यं ताराहतस्वर्णश्वेतयोः स्वर्णरूपके ।
रश्मिर्भासि च रज्जौ च राशिर्मेषादि-पुञ्जयोः ॥५४७॥
रथः स्यात् स्यन्दने नीरे रिष्टं स्यादशुभैनसोः ।
रुजा रोगे तथा भङ्गे रत्नं मणि-प्रकृष्टयोः ॥५४८॥

---

* राजिका पङ्क्तौ रेखायां केदारे राजसर्षपे इति हैमः

रम्भा कदल्यप्सरसोः रणः संग्राम-शब्दयोः ।
रहस्तु मैथुने गुह्ये रती राग-स्मरस्त्रियोः ॥५४६॥
रैशब्दो विभवे हेम्नि रोदनं क्रन्दनाश्रुणोः ।
रोहिणी स्वरभावृत्ते राष्ट्रमुत्पत्ति-देशयोः ॥५५०॥
रदो दन्ते विलेखे च रभसो वेग-हर्षयोः ।
रोकं रन्ध्रे वोके भासि रुक्षोऽस्निग्धे निष्ठुइकु (?) ॥५५१॥
कुंकुमे चारुणे रक्तं रन्ध्रं दूषण-गर्त्तयोः ।

[ल]

ललाम[च] ललामञ्च भूषावालधिराजिषु ॥५५२॥
चिह्नप्रभावयुद्धेषु प्रधाने ध्वज-शृङ्गयोः ।
लोचको मांसपिण्डे स्यान्नीलीरक्तांशुके तथा ॥५५३॥
भ्रुवोश्चर्मणि निर्बुद्धौ लोलः काङ्क्षिणि चञ्चले ।
लिङ्गं शेफसि चिह्ने च सांख्योक्तप्रकृतावपि ॥५५४॥
लघु दैव्यां लध्वसारे हृष्टमगुरु-शीघ्रयोः ।
लालाटिकः क्रियालस्ये प्रभुभालनिदर्शिनि ॥५५५॥
लक्षश्छद्मनि लक्षञ्च संख्याभेद-शरव्ययोः ।
लेखः स्याद्दैवते लेख्ये लेखा स्याद्राजि-रेखयोः ॥५५६॥
लता वल्लयां शाखा-कल्योः पूपिण्या माधवीषु च ।
लेपः स्याल्लेपने जग्धौ लङ्का पूर्भेद-शाखयोः ॥५५७॥
लोहित्यो व्रीहिनदयोर्लुब्धो व्याघ-सतृष्णयोः ।
लीला विलास-क्रीडयो लक्ष्मीपुत्रोहयाच्ययो ॥५५८॥
लभ्यं युक्ते च लब्धव्ये लक्ष्म चिह्न-प्रधानयोः ।
लक्षणं नाम्नि चिह्ने च लालाकं भूखरेऽपि च ॥५५९॥
लोको जने पिष्टपे च लवश्छेदन-लेशयोः ।
लग्नं राश्युदये युक्ते लक्ष्मीपतिर्हरौ नृपे ॥५६०॥

संस्कृतपद्यवाणी

[सचित्रा विचित्रगद्यपद्यमयी त्रैमासिकी संस्कृतपत्रिका]

सम्पादकः—श्रीकालीपदतर्काचार्यः

अस्याः प्राप्तिस्थानम्—संस्कृतपद्यवाणीकार्यालयः

२।१ रामकृष्ण लेन, वागवाजार, कलिकाता।

—:०:—

एषा पत्रिका प्रतिवर्षं नियमेन चतुरो वारानात्मानं प्रकाशयति। अत्र विशिष्टशिष्टगोष्ठीसम्मता दर्शनकाव्यालङ्कारादिसम्बन्धिनो निबन्धाः, सुललिताः कविताः, पद्मबन्धादिचित्रकाव्यानि, यमकादिविचित्रपद्यानि, सुप्रसिद्धभाषान्तरीणगद्यपद्यमयकाव्यानुवादाः, बङ्गभाषासंस्कृतभाषयोस्तुल्य-रूपा गाथा, बङ्गभाषादिप्रथितच्छन्दसा सुरचिताः संस्कृतकविताः, प्रहेलिका-समस्या-तत्पूरणादयः सामयिकवृत्त-ग्रन्थसमालोचनादयश्च विषया अनुरूपया सरलया मधुरया च संस्कृतभाषया प्रकटीक्रियन्ते। अन्तरान्तरा च प्रथितयशसां महाजनानां चित्राणि विचित्राणि चरित्राणि च प्रकाश्यन्ते।

इत्थमेषा पत्रिकान्तरविलक्षणैः संख्यातीतगुणगणैः समन्विता 'संस्कृत-पद्यवाणी' स्वल्पमात्रेणैव कालक्रमेण सहृदयानां सुप्रसिद्धपत्रिकासम्पाद-कानां परेषामशेषाणां विद्वज्जनानां संस्कृतप्रणयिनां विद्यार्थिनाञ्च हार्दिकीं प्रशस्तिपरम्परामासाद्य सुतरां यशस्विनी संवृत्ता।

तदलं विलम्बेन। सर्वे संस्कृतवाणीप्रियाः सत्वरमस्या ग्राहकपद-मङ्गीकृत्य समास्वादयन्तु संस्कृतभारत्याः सुदुर्लभप्रचारां विचित्ररसधाराम्, पत्रिकायामस्यामौदासीन्यवन्तो मा भूवन वञ्चिताः पुनर्महतां भाग्येन सौभाग्येनेति प्राप्तकालमावेदनम्।—

अस्या वार्षिकं मूल्यम्—साधारणग्राहकाणाम्—१॥० सार्द्धरूप्यकम्

सहायकानाम्—३) रूप्यकत्रयम्

परिपोषकाणाम्—५) रूप्यकपञ्चकम्

सहायकानां परिपोषकाणाञ्च नामानि यथाकालं नियमेन पत्रिकायां प्रकाश्येरन। एतदधिकसाहाय्यदातारः 'समाश्रय'पदं लभेरन।

विनीतनिवेदक—श्रीगोपालचन्द्रतर्कतीर्थस्य

(संस्कृतपद्यवाणी-प्रयोजकस्य काशीस्थस्य)

Reg. No. C. 1073

Vol. XVIII, No. 12] [April, 1936.

१८५७ शकीये चैत्रे १८श-वर्षस्य १२श-संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्



सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

Printed and Published by

Dinabandhu Sahityashastri

The Sanskrit Sahitya Parishad, 17, R. G. Kar Road,
Shyambazar, Calcutta.


Printed at
CALCUTTA ORIENTAL PRESS
9, Panchanan Ghose Lane, Calcutta.

Vol. XVIII, 1935-36.

१८५७ शकीये १८श-वर्षस्य

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्



सम्पादकः—

श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

सहकारिसम्पादकः—

श्रीउपेन्द्रमोहन-सांख्यतीर्थः

संस्कृत-साहित्य-परिषत्,
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—३) रूप्यकत्रयम्
Foreign price—7s.

संस्कृतसाहित्यपरिषत्पत्रिकाया अष्टादशवर्षीया सूची

[वर्णसमाम्नायानुसारिणी]

सूचीपत्रं सम्पूर्णम्

———

संस्कृतसाहित्यपरिषत्

April, 1936. | १८५७-शकीये चैत्रे | १८श-वर्षस्य १२श-संख्या | Vol. XVIII No. 12

विज्ञानविज्ञप्तिः

[निबन्धकः—म० म० श्रीदुर्गाप्रसादद्विवेदः]

ऊहापोहविवेचनासु चतुरो न्यायोऽयमास्तामरे
तत्प्रौढा निजसूत्रशातनकृतो जाता अजाता इव ।
अन्याय्यं पुनरेतदीयमपरं लक्ष्येषु लक्ष्येत यद्
वेदा व्याकरणं तथोपनिषदो मूलाश्रयात्पातिताः ॥१॥

[इति तार्किकभूताख्यानम्]

एषां कीर्तिझलञ्झलेन्दुसुषमा दिङ्मूलकूलङ्कषा-
स्ते गङ्गेश-गदाधरप्रभृतयो नास्तिक्यवादान्तकाः ।
एषां सूक्तय एव दृश्यविधया रूपान्तरं प्रापिता
नूनं नूतननास्तिकाशय-नगच्छेदेषु दम्भोलयः ॥२॥

[इति तर्कपरिष्क्रिया]

आसीद् व्याकरणं पुरा श्रुतिरुजां बाधासु धन्वन्तरि-
स्तत्संप्रत्यपि जाग्रदेव न पुनस्तत्पातसिन्धौ तरिः ।
सैतत् स्नेहवशादुपेत्य जननीकल्पा वराकी सती
स्मारं स्मारमुदारसारमधुना क्लिश्यत्स्वरं क्रोशति ॥३॥

[इति व्याकरणगजनिमीलिका]

मीमांसाविधिगर्हणेन वलते वेदोऽन्यथा मीयते
गृह्यं गर्ह्यदशामुपैति सुकृती शब्दोऽपशब्दायते ।
हे वैयाकरणाः ! प्रयोगशरणाः !! किं नैवमुन्नीयते
यद् वः संक्रमितुं मुखानि कुटिलो नीलो घटः सर्पति ॥४॥

न्यायस्तर्कमयोऽप्रतिष्ठिततया वाव्रज्यतामुच्चकै-
रङ्ग ! व्याकरण !! त्वया स्थिरतया वेदः कथं हाप्यताम् ।
यद् वाणीवलभीभवन् स तु कृतीदानीं हि चित्रीयते
किं कुड्येऽसति चित्रसंगतिरियं व्योमारविन्दायते ॥५॥

[इति व्याकरणप्रतिष्ठानम्]

मन्त्रब्राह्मणवर्त्मनी मुनिवरैर्वेदाख्यया ख्यापिते
प्रायस्तत्र पुराणलक्षणतनूः संक्षेपतः सङ्गता ।
यो भूयानिह वंशविस्तरमहःप्रक्षेपयोगावहः
सोऽप्येषोऽन्यपुराणसङ्गतिधिया संवादतोऽन्वीयते ॥६॥

हे हे तात ! पुराणखण्ड !! भवतः संख्याप्रमेयाकृती-
र्व्यस्ताश्चोपलभामहे प्रतिकृतीः शुद्धा न वीक्षामहे ।
भट्टाः स्वार्थमुपासते क्षितिभृतो यौष्माकसेवाकृते
विद्वद्भ्यो नो वितरन्ति किंचिदधुना कांस्कान् किमाचक्ष्महे ॥७॥

[इति पुराणचर्चा]

आम्नायार्थविजृम्भितस्य परिषद्रामायणस्याऽऽसवः
प्रेक्षावेश्म बृहत्कथाप्रतिभुवः संसारसारायिताः ।
यश्चाऽऽस्ते कविकर्मकौतुककलाकल्याणकल्पद्रुम-
स्तस्मै भारतभारतीप्रणयिने शश्वन्नमस्याञ्जलिः ॥८॥

वेदो विद्यत एव सोऽङ्गविसरैः स्वस्थो वरीवृत्यते
किं त्वेष प्रथमाननास्तिकवलात् संवृत्य कूर्मायते ।

ब्रह्मक्षत्रमहो मही न कलयत्युद्विग्नमाचेष्टते
कष्टं धर्मकथैव दर्शनधिया कन्थावृता लीयते ॥९॥
[इति समयाख्यानम्]

गोद्रीन्द्वद्रिकृताङ्कदस्रनगगोचन्द्रेऽब्दके वा शके
[१९७२९४७१७९ + वर्तमानः शकः]
वेदास्तत्प्रतिपाद्यधर्मविषया वैषम्यमीयुः कियत् ।
इत्युत्प्रेक्ष्य मुहुर्मुहुस्तरतमक्षोदांश्च कृत्वा भृशं
तत्त्वं बुध्यत एव दुर्मदकथागाथाविवादोत्थितम् ॥१०॥
[इत्यालोचनाख्यानम्]

खेटानां परकीयवेधगणितान्यादाय वादान्तरात्
प्राशस्त्यं घटयन्ति नात्मकलया ज्योतिर्विधास्वासते ।
ये धर्मोत्थविचारणासु जनता विन्ध्यस्य पार्श्वद्वये
व्यामोहं प्रणयन्ति तेषु निपतत्पाणिग्रहं सत्क्रिया ॥११॥
देशो भ्रश्यति धर्म एष हतको काश्चित्प्रथां प्राप्यते
वेदव्याकृतिवाग्बलेन जनता सौभाग्यमारोप्यते ।
यज्ज्ञातं विषयान्तरे तदखिलं वेदात् समुत्थाप्यते
दौर्भाग्येन न वीक्षते परहितं कस्मै किमावेद्यताम् ॥१२॥
[इति पार्श्वप्रेक्षिका]

---

*जीवनवृत्तान्तः

[निबन्धकः—श्रीकालीपदशास्त्री]

विदितैव सर्ववर्णाश्रमसमाजान्तर्वर्त्तिभिर्जनवर्गैर्विशेषतश्च विबुधपदसमलङ्कृतैर्भूमिदेवैरस्मिन् वङ्गाख्ये प्रदेशे नवद्वीप-कृष्णनगर-भाटपाडा-विक्रमपुरेत्यादिवत् हाओडामण्डलान्तःपातिनो झिखिराभिधाना पल्ली। इयञ्च तावद् बहुकालतो विशुद्धपण्डितानामाकरीभूता ससम्मानविराजिता, विशुद्धपण्डितानामावासगौरवेण गौरवान्विता पवित्रा झिखिराख्या पल्ली भूतपूर्वभारतराजधानीकलिकातायाः पश्चिमतो न्यूनाधिकं विंशतेः क्रोशेभ्यो दूरे आमतामण्डलान्तर्गतायाः भूतपूर्वसंस्कृतकलेजाध्यक्षस्य स्वर्गीयमहेशचन्द्रन्यायरत्नमहोदयस्याऽऽवासभूमेर्नारीटेत्याख्यपल्ल्या उत्तरांशे वर्त्तते।

अस्यां वङ्गेषु तत्प्राथम्येनागतानां ब्राह्मणानामन्यतमस्य भट्टनारायणस्य वंशसम्भूताः केचन राढीयब्राह्मणपरिवाराः प्रतिवसन्ति। वङ्गदेशीयस्वधर्मनिष्ठपवित्रब्राह्मणवंशानामन्यतमोऽयं गुरुत्वाभिमानी। प्राचीनविद्वत्समाजेषु शीर्षस्थानीयोऽयं वंशोऽसामान्यधीशक्तिसम्पन्नैर्नैयायिक-स्मार्त्तादिपण्डितानां जननैः कृत इति ज्ञायते। वंशेऽस्मिन् तदानीन्तननृपतिचयैरभिवन्दितचरणयुगलोऽसामान्यन्यायशास्त्रानुशीलनेन परिमार्ज्जितधीशक्तिसम्पन्नो नैयायिकस्मार्तपण्डितैकगुरुः सर्वशास्त्रविशारद आसीत् कश्चिद् राजेन्द्रनाथसार्वभौमनामाऽसाधारणप्रतिभोद्भासितो धर्मप्राणः पण्डितप्रवरः।

श्रूयते कदाचिद्दिल्लीनगर्यां स्वीयपरिषदि कौतूहलाक्रान्तेनाऽऽकबरबादसाहेनाऽऽहूतास्तावद्भारतीयपण्डितप्रवरास्तेषां विचारचातुर्येण पाण्डित्योत्कर्षेण च प्राधान्यं निर्णेतुम्। सार्वभौममहोदयोऽपि तस्यामाहूतः सन् स्वीयप्रतिभाबलेन भारतीयपण्डितप्रवराणां शीर्षस्थानमध्यकरोत्।

---

* स्वर्गतानां सुगृहीतनामधेयानां पण्डितप्रकाण्डानां कलिकातापण्डितसभासम्पादकानां दक्षिणाचरणस्मृतितीर्थमहोदयानाम्।

तद् दृष्ट्वा गुणग्राही बादसाहमहोदयः सानन्दं जयिनं सार्वभौममहोदयमभिवाद्य तस्मै स्वाक्षरान्वितं दशसहस्र'विघा'परिमितभूमेः सनन्दपत्रमदात्। एतदवलोक्य सार्वभौममहोदयः क्रन्दितुमारेभे। बादसाहमहोदयेन किन्तावत क्रन्दनकारणम् इति पृष्टः सार्वभौममहोदयः कथितवान्, भो! महोदय! भवता यत् कृतं तेन ममान्वयेऽतः परं न कोऽपि पण्डितो भविष्यति, यतो भवत्प्रदत्तभूमेर्भागधेयभोगाभिलाषेणैव तेषां ज्ञानपिपासा तिरोहिता भविष्यति। एतच्छ्रुत्वा बादसाहमहोदयस्तस्य सन्तुष्टिविधानाय स्वयमुपायनरूपेण प्रदत्तं तत् सनन्दपत्रं प्रत्याहृत्य तस्य त्यागशीलताया भूयसीं प्रशंसामकरोत्।

अयन्तावत् सार्वभौममहोदयः पुरुषगणनया भट्टनारायणतो विंशस्थानीयः। अस्य च त्रयः पुत्रा आसन्। एषां ज्येष्ठो हुगलीजेलान्तःपातिनि रामनगरेत्याख्ये ग्रामे, मध्यमो हाओड़ामण्डलान्तःपातिनि नारीटेत्याख्ये ग्रामे, कनिष्ठो झिखिरेत्याख्ये च ग्रामे वासं स्वीचक्रुः। एते सर्व एवासामान्यपाण्डित्यगुणगरिम्णा तदानीन्तनसमाजेष्वाधिपत्यमधिकुर्वतां पण्डितानां शिरोमणिभूता आसन्। ज्येष्ठो रामनगरग्रामं यवनैराक्रान्ततया परित्यज्य कृष्णनगरेति नाम्ना विख्यातस्य समाजस्याधिपतिरूपेणाधिष्ठाय दिगन्तविस्तृतपाण्डित्यप्रतिभाबलेन विचारबलेन च विक्रमपुर-नवद्वीपस्थ-पण्डितान् विजित्य महामहोपाध्यायस्मार्त्तरघुनन्दनभट्टाचार्यमहोदयानां भूयसां विदुषाञ्चाभिमतामपि व्यवस्थां प्रतिभया शास्त्रव्याख्यानैपुण्येन चान्यथा प्रतिपादयामास, इदानीमपि तस्य मनीषिणो व्यवस्थासिद्धान्तस्तत्रान्यत्र च प्रतिष्ठामावहति।

मध्यमपुत्रान्वयसम्भूतोऽस्माकम् अध्यापकवर-संस्कृतकालेजाध्यक्ष-स्वर्गीय-स्वनामधन्य-महामहोपाध्याय-महेशचन्द्रन्यायरत्नः सि, आइ, इ. महोदयोऽस्मिन् वङ्गाख्ये प्रदेशे संस्कृतोपाधिपरीक्षाप्रवर्त्तनादिगीर्वाणवाण्यनुप्राणितशास्त्रोन्नतिविधायककार्यावलीविधानेन जगत्यविनश्वरकीर्त्तिमर्जयित्वाऽमरलोकमगात्।

कनिष्ठपुत्रस्यान्वयसम्भूतोऽयमस्माकं स्मार्त्तशिरोमणिः स्मृतितीर्थमहोदयो भट्टनारायणतः षड्विंशपर्यायान्तर्गतः। तस्य च पुत्रो वीरेश्वरस्ततपुत्रो नन्दकिशोरस्ततपुत्रः कामदेवस्ततपुत्रो रामशम्भुस्ततपुत्रो दुर्गाप्रसादचूडामणिः। अयन्तु तावद् ऋषिकल्पः स्वनामधन्यः सर्वशास्त्रवित् स्वधर्मनिष्ठः पण्डितप्रवरश्चासीत्। चूडामणिमहोदयस्तु चतुष्पाठीं संस्थाप्य सर्वथा पञ्चाशतं छात्रान् वासस्थानाहारादिना परिपोष्य काव्यव्याकरणस्मृतिन्यायादिशास्त्राण्यध्यापयामास। अयन्तु तावन्मृत्युकालतः षड्भ्यो मासेभ्यः पूर्वं स्वीयपुत्रानाहूयावोचत्, मम तावज् जीवनकालस्य षडेव मासा अवशिष्यन्ते, शृणुत यूयम्, नास्ति मे गङ्गामृत्युयोगः। पूर्णे षण्मासे दिवा द्विप्रहरान्तसमयो ममान्तिमः काल इति मया ज्ञातम्। दण्डद्वयात् पूर्वं विष्णुमन्दिरस्य पुरतो मां नीत्वा युष्माभिर्भगवद्दामोदरशिलामुरसि मे निधाय मदीये श्रवणयुगले तारकब्रह्मनामोच्चारणीयम्। मम मृत्युकालतो मुहूर्त्तद्वयात् पूर्वं मत्सङ्केतमवधार्य दामोदरशिला केनापि भिन्नगोत्रीयेण ब्राह्मणेन मम पुरतो दण्डद्वयं यावत् संरक्ष्य ममावसानात् परं मन्दिरं प्रवेशयितव्या। श्रुतं तावदस्माभिः स्मृतितीर्थमहाभागेभ्यो यद् यथोदितेन प्रयाणेनैव तद्वचनमवितथमिति प्रमाणीकृतम्।

महाभागस्यास्य त्रयः पुत्रा आसन्। प्रथमो वरदाचरणो द्वितीयश्चन्द्रशेखरस्तृतीयस्तु स्मार्त्तशिरोमणिर्दक्षिणाचरणः। एकसप्तत्यधिकसप्तदशशताब्दीयाषाढमासस्य सप्तदशदिवसे पातिव्रत्यपरायणयाऽशेषगुणसमन्वितया छात्रवत्सलयाऽन्नदाननिरतया साक्षादन्नपूर्णयेवान्नपूर्णानामधेयया जनन्या प्रसूतोऽयं स्मृतितीर्थमहोदयः। अयन्तु तावद्बाल्यकालतोऽसाधारणधीशक्तिसम्पन्नः स्वभावतश्चञ्चलमतिश्चाऽऽसीत्।

विद्यारम्भकालतः पितुः सकाशे संक्षिप्तसारव्याकरणं पठितुमारेभे। पितुर्मृत्युकालादर्वाक् ततसकाशे कृताध्ययनः स्मृतितीर्थमहोदयो हुगलीजेलान्तःपातिनीं गौरहाटीत्याख्यपल्लीं गत्वा तत्रत्यवैयाकरणकेशरिणां श्रीधरतर्कालङ्कारमहोदयानां समीपे टिप्पन्यादिसहितं संक्षिप्तसारव्याकरणं

सम्यगधीत्य प्रसिद्धां कृष्णनगराख्यपल्लीं गत्वा तत्रस्थद्वितीयस्मार्त्तप्रवरेभ्यो मधुसूदनतर्कालङ्कारपादेभ्यः स्मृतिशास्त्रमध्येतुमारभत। कृष्णनगरस्य परिचयस्तु प्रागेव प्रदत्तः। अस्यात्र पठनसमये स्मृतिन्यायादिदर्शन-शास्त्राध्यापिकाः पञ्चाशच्चतुष्पाठ्यो विराजमाना आसन्। तदा तत्र-स्थाध्यापकाः स्मृतितीर्थमहोदयस्य व्याकरणशास्त्रविषयिणीं प्रतिभामुप-लभ्य व्याकरणशास्त्रीयामेकां चतुष्पाठीं प्रतिष्ठाप्याध्यापनार्थं पण्डितमहोदयं नियोजयामासुः। महाभागस्त्वयमध्यापनाचातुर्येण तत्रस्थान् पण्डितान् सन्तोष्याशेषकीर्त्तिपटं विततान। कियतश्चिद् वत्सरान् यावत् स्मृतिशास्त्र-मधीत्यालोकसामान्यं ज्ञानमुपलभ्य न्यायशास्त्राध्ययनाय भारतविश्रुत-पण्डितप्रवराणां महामहोपाध्यायश्रीयुक्तकामाख्यानाथतर्कवागीशमहोदयानां समीपे न्यायादिदर्शनशास्त्राणि पपाठ। तस्मिन्नेव समये राजकीयसंस्कृत-कालेजाभिधविद्यालये महामहोपाध्याय-पण्डित-मधुसूदनस्मृतिरत्नचरणेभ्यः प्राचीननव्यस्मृतिशास्त्रीयवादग्रन्थजातं विशेषेणाधीत्योपाधिपरीक्षासृष्टेः प्रथमाब्द एव धर्मशास्त्रस्योपाधिपरीक्षायां प्रथमस्थानमधिकृत्य स्मृतितीर्थो-पाधिमलभत।

स्मृतितीर्थमहोदयस्तदानीन्तनस्मृतिशास्त्राध्यापकानामन्यतमत्वमधिकृत्य मृत्युकालं यावत कलिकातानगर्यां स्मृतिशास्त्रीयचतुष्पाठीं संस्थाप्याहार-वासस्थानदानेन बहूंश्छात्रान अध्यापयामास। अपि चायं महोदयो बहून् वत्सरान संक्षिप्तसारव्याकरणस्मृतिशास्त्रीयोपाधिपरीक्षायां परीक्षकत्वेन निर्दिष्ट आसीत। अधुनैवं तावद् बहवः स्मार्त्ता अस्मद्देशे विराजन्ते ये तावत् स्मृतितीर्थमहोदयेभ्योऽधीत्य स्मृतिशास्त्रमुपलभ्य स्मृतितीर्थोपाधिं संस्थाप्य च चतुष्पाठीं स्मृतिशास्त्रमध्यापयन्ति।

स्मार्त्तप्रवरोऽयं स्वकीयस्मृतिशास्त्रीयाभ्रान्तविद्यावत्ताप्रभावेण वङ्गीय-प्रधानविचारालये (High Court) बहुशस्तावदामन्त्रितः सन् विचार-पतीनां दायभागसम्बन्धीयसंशयं शास्त्रप्रमाणेन युक्त्या च विचार्यापनुद्य च, सुसिद्धान्तानवास्थापयत्। ते तावत् सिद्धान्ताश्चिराय विधिरूपेण विराजन्ते।

स्वधर्मनिष्ठः शास्त्रानुरागवानयं महोदयः कालक्रमेण जनान् धर्मशास्त्रे संस्कृतभाषायाञ्च वीतस्पृहानवलोक्य शास्त्ररक्षणाय महता प्रयत्नेन स्वर्गीय-महानुभव-महामहोपाध्याय-महेशचन्द्र-न्यायरत्नस्य राय-बाहादुरराजेन्द्र-नाथशास्त्रिणः पूज्यपादकेशवानन्दसरस्वतीमहोदयस्य महानुभवनवीनचन्द्र-दत्तस्य स्वधर्मनिष्ठविनयकृष्णदेवबाहादुरस्य महाराज-यतीन्द्रमोहनठाकुर-प्रभृतीनाञ्च धर्मप्राणदेशहितैषिसंस्कृतानुरागिमहोदयानां साहाय्येन स्वप्रति-ष्ठितकलिकातापण्डितसभातः संस्कृतप्रथमद्वितीयपरीक्षे प्रावर्त्तयत। संस्कृत-परीक्षायाः सुपरिचालनार्थं राजानुमोदितसंस्कृतपरीक्षाकेन्द्रसमितेः कलिकातापण्डितसभायाः प्रथमद्वितीयपरीक्षयोश्चिराय रक्षणार्थं महाराज-यतीन्द्रमोहनठाकुरमहोदयाननुरुध्य गृहीत्वा च तेभ्यः १६०००) षोडशसहस्र-मुद्राः सरकारबाहादुरसविधे निधाय तत्कुसीदतो "हरकुमारठाकुर" इति नामाध्यापकवृत्तिं विधाय च भारतेऽमरकीर्तिं रक्षितवान्। महोदयोऽयं परीक्षासभायाश्चतुश्चत्वारिंशद्वत्सरान् क्रमेण कार्याणि परिचालयामास। लोकान्तरितमपि महोदयं परीक्षेयममरं करिष्यतीत्याशां पोषयामो वयम्।

धर्मैकनिष्ठमतिर्महोदयोऽयं मातुः पारलौकिकानन्दविधानाय श्रीमद्भाग-वत-रामायण-काशीखण्डादिकं पाठयित्वा तुलादानाभिधं महादानञ्च कार-यित्वा स्वार्जितान् बहूनर्थानुत्ससर्ज। प्रथमकन्यायाः साक्षाद्भारतीप्रतिमाया इव भारत्या उद्वाहसम्पादनाय च बहूनर्थान् व्ययितवान्। विशेषतः परमकारुणिकस्मृतितीर्थमहोदयानां दरिद्रविधवानां तथा निरवलम्बनानाञ्च भरणायाऽऽसीच्च गुप्तदानादिकम्।

महोदयस्तावदन्तिमसमये संरक्ष्यातिक्रान्तपञ्चाशद्वर्षं पत्नीद्वयम्, विश्वविद्यालयतः ससुवर्णपदकम् एम, ए, इत्युपाधिं प्राप्तमेकत्रिंशद्वर्षीयं पुत्र-मेकम्, दुहितरमेकाम्, जामातरमेकम्, प्रान-विचारालये विधि (आइन) व्यवसायिनमेकं चिकित्साव्यवसायिनमेकं स्थापत्यविद्याविभूषितञ्चैकं दौहित्र-त्रयमपरमप्राप्तवयस्कदौहित्रत्रयम्, दौहित्रीत्रयञ्च, समादिश्य सर्वानात्मीयां-स्तारकब्रह्मनामकीर्त्तनाय पिबन् जाह्नवीतोयं निरीक्ष्य हृदयकन्दरे स्वेष्टदेवता-

कृतिं जपन् स्वेष्टमन्त्रं परित्यज्य च दुःखाकरं भवसंसारं स्वार्ज्जितार्थव्ययेन निर्मिते विश्वकोषवर्त्मस्थे पञ्चसंख्याङ्कितवासभवने न्यूनाधिकषडशीतिपरिमितवर्षे चिरशान्तये शान्तिमयलोकं समाश्रयत ।

इति शम् ।

सम्पादकविरचितटीकासनाथः

द्वितीयपुलिकेशिनः शिलालेखः

जयति भगवाञ्जिनेन्द्रो वीतजरामरणजन्मनो यस्य ।
ज्ञानसमुद्रान्तर्गतमखिलं जगदन्तरीपमिव ।।१।।

भगवान् षडैश्वर्यशाली **जिनेन्द्रो जयति** सर्वोत्कर्षेण वर्त्तते । यद्वा, जयतीत्यत्र तुपः स्थाने तिप् तेन सर्वोत्कर्षेण वर्ततामित्यर्थः । **यस्य** भगवतो जिनेन्द्रस्य **वीतजरामरणजन्मनः** वीतानि जरामरणजन्मानि यस्य तस्य अजस्याजरस्यामरस्य च **ज्ञानसमुद्रान्तर्गतं** ज्ञानलक्षणसिन्धुमध्यावस्थितम् **अखिलं** समग्रं **जगत् अन्तरीपमिव** द्वीपमिव । अत्रोत्तरवाक्यगतत्वाद् यच्छब्दस्तच्छब्दोपादानं नापेक्षते । करतलामलकीकृताशेषभुवनो जन्मजरामरणविवर्जितो जिनेन्द्रः सर्वोत्कर्षेण वर्तताम् । एतेन स्वप्रणतिः सूच्यते । किरातार्जुनीये [५।२२] "वीतजन्मजरसाम्" इति पदमुपलभ्यते, अमरकोषस्य च प्रारम्भे 'यस्य ज्ञानदयासिन्धो'रिति ।।१।।

तदनु चिरमपरिमेयश्चलुक्यकुलविपुलजलनिधिर्जयति ।
पृथिवीमौलिललाम्नां यः प्रभवः पुरुषरत्नानाम् ।।२।।

तदनु जिनस्य सर्वोत्कर्षेण वर्तनादनन्तरम् **अपरिमेयः** महासत्त्वत्वादितया परिच्छेत्तुमयोग्यः **चलुक्यकुलविपुलजलनिधिः** चलुक्याख्यक्षत्रियान्ववायरूपस्फीतसागरी **जयति** । **यः** किल चलुक्यकुलजलनिधिः **पृथिवी-**

मौलिललाम्नां वसुन्धराशिरोरत्नायमानानां **पुरुषरत्नानां** नरश्रेष्ठानां **प्रभव** उत्पत्तिस्थानम्। अत्राप्युत्तरवाक्यगतत्वेन यच्छब्दस्य तच्छब्दनिराकाङ्क्षत्वम्। वाक्यान्तरत्वाच्च न समाप्तपुनरात्तताख्यदोषापत्तिः। रूपकमलङ्कारः। तेन च चुलुक्यवंशस्य बहुविस्तृतत्वमत्यद्भुतप्रभावश्च सूच्येते ॥२॥

शूरे विदुषि च विभजन् दानं मानं च युगपदेकत्र।
अविहितयथासंख्यो जयति च सत्याश्रयः सुचिरम् ॥३॥

सत्याश्रयस्तदाख्यश्चुलुक्यनरपतिः शूरे वीरे **विदुषि** विपश्चिति **युगपत् एकत्र दानं मानं च विभजन्** प्रतिपादयन् वीरं विद्वांसमुभयमपि दानमानाभ्यां सम्भवायन् **अविहितयथासंख्यः** 'यथासंख्यमनुदेशः समानानाम्' [पा० १।३।१०] इति न्यायेन शूरे दानं विदुषि च मानम् इति क्रममनादृत्य वर्तमानः सत्याश्रयस्त-दाख्यो नृपवरः **सुचिरं जयति**। अनुरूपोक्तिः किरातार्जुनीये [१।१२]

निरत्ययं साम न दानवर्जितं
न भूरि दानं विरहय्य सत्क्रियाम् ॥ इति

सत्याश्रयस्य पुलिकेश्यपरनामधेयस्य तदानीन्तननरपतित्वात् तस्य सुचिरं जयमा-शास्ते कविः ॥४॥

पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरं यातः।
तद्वंशेषु जिगीषुषु तेषु बहुष्वप्यतीतेषु ॥४॥
नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनाऽऽत्मसाद्
राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः ॥५॥

येषां नृपतीनां **पृथिवीवल्लभशब्दो** धरापतिशब्दः **चिरं** दीर्घं कालं व्याप्य **अन्वर्थतां** सार्थकत्वं **यातः** प्राप्तः। पृथिवीवल्लभशब्दो हि नृपतिशब्द-पर्यायः। अत एव रूढिर्योगमपहरतीति न्यायेन यः कोऽपि नृपतिर्भवति स लीलया धरां पालयतु वा महता वायासेन विरक्तां धरां कथञ्चिद्द्वित्रान्

वत्सरान् स्वायत्तां विदधातु पृथिवीवल्लभशब्देनैव परिगीयते। अत्र तु पृथिवीवल्लभशब्दस्य यौगिकार्थोऽपि सम्यक् लगति। **तद्वंशेषु** लक्षणाया तद्वंश्येषु इत्यर्थः **तेषु** प्रसिद्धेषु **बहुषु अपि जिगीषुषु अतीतेषु** पुरन्दपुरातिथिभूतेषु **जयसिंहवल्लभ इति ख्यातः चलुक्यान्वयः** चलुक्यवंशसमुद्भूतो **राजा आसीद्** इत्यन्वयः। किम्भूतोऽसावित्याह—**येन भावितचापलापि** प्रथितचाञ्चल्यापि **लक्ष्मीः** श्री **रणे** युद्धे **शौर्येण** पराक्रमेण **आत्मसात् चक्रे** स्ववशमानिन्ये। किम्भूते रणे? **नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे** उच्चावचशस्त्रास्त्रजालप्रहारेण निपतिताश्च भ्रान्ताश्च अश्वाश्च पत्तयश्च द्विपाश्च यस्मिन् तथाभूते। पुनः किम्भूते? **नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे** नृत्यन्तो भीमाः कबन्धाः अपमूर्धकलेवराः खड्गकिरणज्वालाश्च असितेजःशिखाश्च तासां सहस्राणि यत्र तस्मिन्।

अयं भावः। एतेषां हि राज्ञां पृथिवीवल्लभ इति विरुदं चिरं सार्थकमासीत्। एषां च प्रथिततमेऽन्ववाये बहवो वीराः समुत्पन्ना विनष्टाश्च। ततश्च जयसिंहवल्लभसमाख्यः कश्चन शूरो भुवनभीषणायोधने शत्रून् विजित्य राजलक्ष्मीं स्ववशमानिन्ये। यद्यपि लक्ष्मीः स्वभावलोलेति जागर्ति प्रवादस्तथापि तस्यास्तदयशः संश्रयदोषरूढमिति मत्वा तत् परिमार्ष्टुकामेनानेनैवं विहितम् ॥४।५॥

तदात्मजोऽभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः।
अमानुषत्वं किल यस्य लोकः सुप्तस्य जानाति वपुःप्रकर्षात् ॥६॥

तस्य जयसिंहवल्लभस्य **दिव्यानुभावः** दिव्यप्रभावः **जगदेकनाथः** एकातपत्रं जगतः प्रभुत्वमनुभवन् **रणरागनामा** रणराग इति ख्यात **आत्मजस्तनयः अभूद्**-बभूव। **सुप्तस्य यस्य** निद्रितस्यापि यस्य **अमानुषत्वं** देवभावं **लोको** जनः **वपुःप्रकर्षात्** शरीरसौभाग्यविशेषात् **जानाति** ऊहते। यद्यपि देवा न निमिषन्ति अयं तु यथाकालं स्वपित्येव तथापि एतस्यामनुजसाधारणं शरीरसौष्ठवमस्यामर्त्यभावं प्रत्याययति स्म ॥६॥

तस्याभवत्तनूजः पोलेकेशी यः श्रितेन्दुकान्तिरपि।
श्रीवल्लभोऽप्ययासीद् वातापिपुरीवधूवरताम् ॥७॥

तस्य रणरागस्य **पोलोकेशी**ति पोलोकेशिसमाख्यस्तनूजस्तनयः **अभवत्**। यः **श्रितेन्दुकान्तिरपि** सुधाकरकरवन्मनोज्ञोऽपि इन्दुकान्तिपरिग्रहोऽपीति ध्वनिः, **श्रीवल्लभोऽपि** राजलक्ष्मीवाल्लभ्यमधिगतोऽपि परिग्रहद्वयसद्भावेऽपीत्यर्थः, **वातापिपुरीवधूवरताम्** वातापिनगरीलक्षणाया वध्वा वरतामयासीत्, वातापिनगर्यधीशत्वं प्रापेत्यर्थः। अत्र विरोधाभासः ॥७॥

(क्रमशः)

नलिनीवसन्तम्

[निबन्धकः—श्रीशिवशङ्कर-शास्त्री]

अज्ञातस्वभारतीप्रकाशविषया नलिनी तद्रजनीजनिताभिनवमन्मथा प्रणयिनमाजुहाव नामग्राहम्—"वसन्त ! वसन्त ! कथं त्वं वसन्ताभिधानोऽसि ? मदर्थं प्रत्याख्याहि ते वंशसंस्तवं स्वनामधेयञ्च। न चेदिच्छसि कर्त्तुमेतत्तर्हि शपथं कृत्वा भव मे प्रणयस्थानमिति।

निशम्यैतामुद्यमशंसिनीं वाचं वसन्तः सानन्दं प्रतिवचनं दातुमुद्यतोऽभवत् परन्तु श्रोतुकामोऽधिकं न किञ्चिदभणत्। नलिनी तु यथापूर्वं चिन्तयितुं प्रावर्त्तत। सा तु वसन्तं तस्य घृणितान्वयस्य तथाऽभिधेयस्य च त्यागायाऽऽदिशत्। "अन्वयं नामधेयञ्च शक्यते चेत् परित्यक्तुं तर्हि त्वयाऽहं सर्वथा लभ्ये"ति। एतत्प्रणयगर्भवचनानि शुश्रुवान् वसन्तो नातः परं स्थातुमशक्नोत्तस्या अदत्त्वा प्रतिवचनम्। वसन्तो नलिनीलपितानि प्रत्यक्षमिव तथा काल्पनिकञ्च मन्यमानः 'प्रणय' इति नाम्ना पराभिमतनाम्ना वाह्वानायाऽऽदिदेश। वसन्ताभिधानं तुभ्यं न रोचते चेत्तर्हि त्यक्तवसन्ताभिधानोऽस्म्यहमतः परमिति। अध्युद्यानं स्वरं निशम्य कस्यचिन्नरस्य सा विविग्ना सञ्जाता।

सहसा ज्ञाततत्प्रणयविषयोऽन्धकारपिहितविग्रहजनो हि को नाम भवेदिति बभूवालं सा प्रथममेव नावधारयितुम्। इत्थं कथयत्येव तस्मिन्नश्रुतवसन्तशतवाक्यापि नलिनी स्वरेणाञ्जसा प्रणयिन्याः श्रवणशक्तेः प्रखरत्वात्तं 'वसन्त' इत्यज्ञासीत्।

फलवाटिकोल्लङ्घनजातव्यसनेन तमनुयुक्तवती। यतो दृश्यते चेत् स्वेन केनचित्तर्हि विक्रमसेनतनयत्वात्तस्य जीवितसंशयो भविष्यति। "हन्त! तवाकरुणदृष्टेर्नाधिकभीतिर्जायते मे तेषामवस्कन्दनात्। प्रसन्ननयनयोर्नयसि चेद् गोचरत्वं मां तर्हि तृणाय मन्येऽहं तेषामाक्रमणम्। तेषां वैराचरणेन जीविताबशेषो वरम्, न पुनस्त्वत्प्रणयविनाकृतख्यातगर्हणजीवितधारणम्" इति प्रत्युवाच वसन्तः।

"कस्यानुशासनेन त्वमित आयात" इति नलिन्युवाच। "प्रेम्णा चालितोऽहम्। त्वच्चेत् पारेमहोदध्यस्थास्यस्तर्हि त्वत्प्रतीकाशपण्यद्रव्यहरणायाहं पारावारतरणमकरिष्यमि"ति प्रत्यभाषत वसन्तः। एतच्छृण्वती व्रीडारुणमुखश्रीः सञ्जाता नलिनी वसन्तानुपलक्षिता। "साऽनिच्छया प्रथितानुरागा जातेति मनसि चिन्तयाञ्चकार। सा चेत् प्रत्याहर्त्तुं स्वभणितानि शक्ताऽभविष्यत, हृष्टा तर्ह्यभविष्यत। परन्तु तदसम्भवम्। नूनं सा प्रमना अभविष्यत् प्रणयिनश्चेद् गृहीतकृत्रिमगम्भीराकृतिर्दूरे विन्यवेशयिष्यदुताहो बुद्धिमन्नारीणां रीत्या भ्रूभङ्गं व्यधास्यदाहोस्वित् कक्षेणानादरेणैक्षिष्यत।

इतरा नार्यः प्रथमं प्रणयिनस्तासां कर्कशगिरा प्रत्यादिशन्ति। येषु गच्छन्त्यतिभूमिं तासामनुरागस्तेभ्य आत्मानं प्रतिष्ठापयन्ति। शालीनतयाऽनादरमिषेण वा प्रणयिनीप्रणयलाभो हि दुरापमिति प्रणयिनो बोधयति। कस्यचिद्वस्तुनो ह्यागमक्लेशस्तद्वस्तुनो महार्घत्वं सूचयति। नाविद्यत तस्यास्तु नलिन्याः प्रणयापह्नवोपायः कश्चित। मनसाऽप्यधृष्यवसन्तो नलिनीमुखनिःसृतप्रणयगर्भवचनानि अश्रौषीत्। अतोऽभिनवावस्थापन्ननलिनी सकपटं प्रागुक्तगिरां समर्थनमकार्षीत्। "कान्त वसन्त" इति नाम्ना साजुहाव। मधुरायते खलु नामधेयमतर्पणमपि प्रेम्णा।

"प्रकटितप्रणयत्वाद् मां लघुचेतसं तथा विगुणां मास्म मंस्था" इति वसन्तमनुरुद्धवती नलिनी। "प्रणयप्रकटनं दोषायैव सम्पद्यते चेत्तर्हि तद्-यामिन्या आकस्मिवृत्तस्य दोषो हि यस्यां तस्या मनसो भावः साश्चर्यं प्रकाशतां गतः।

मदाचरणं त्वां प्रत्यबलाज्ञातिरीत्यानतिविचाराधीनमपि पिशुनमतिभ्यो वनिताभ्यः कूटत्रपावतीभ्यश्चाहं विश्रब्धतमेति प्रतिपादयिष्यामि नलिनीत्या-ददे। नलिनीसङ्काशप्रतीक्ष्यवरवर्णिनीमधिकृत्यासस्माईभावेन मनसि मे केनचित् पदं न लब्धमिति दिवा शपथं शप्स्यमानं निवर्त्य शपथस्या-करणायान्वरौत्सीन्। वसन्तं प्राप्य प्रमुदितचित्ताप्यतिदुःसाहसिके निरतिशयोपदेशहीने तथातर्कितोपपन्ने चाङ्गीकारे नाविद्यत तस्याः कश्चि-द्धर्षस्तद्रजन्याम्। अन्योऽन्यप्रणयशपथविनिमयाय तामनुनिनाय वसन्तः। करिष्यतेऽनुरोधं वसन्ताय दत्तहृदया संवृत्तेति प्रतिवचनं प्रत्यपद्यत नलिनी। [श्रुतानि वसन्तेन नलिनीहृदयभाषितानीत्यर्थः]। पुनः प्रणयसुखानु-भवाय सा प्रागुक्तानि प्रत्याहार्य प्रणयदित्सायाः प्रेम्णाश्चाऽसीमत्वाच्च जलनिधि-वद्भूयः प्रणयस्याङ्गीकारमैच्छत्।

ईदृशे च परस्परानुव्यापारे सा पार्श्वशयधात्र्याहूतोदचलत्। सा धात्री नलिनीशयनकालोऽयमित्यमंस्त। यतः परिणतकल्पा हि शर्वरी सञ्जाता। नलिनी तु प्रत्यावृत्त्यावलम्बितं वसन्तं त्रिचतुराणि वचांसि व्याजहार। अयमेव तस्या वाचां निष्कर्ष आसीत् "तस्य प्रणयश्चेत् सम्मान्यो भवेत्, परिणयश्चेदस्य प्रणयस्य लक्ष्यो भवेत्तर्हि कश्चिद्दूतः प्रेषणीयः।" परिणयसमये सा तस्याः सर्वस्वं वसन्ताय दाता, स्वामिनश्च सर्वत्र जगतः सध्रीची भवितेति। इत्येवं स्थिरीकृतवत्यां नलिन्यां धात्र्या जोहूयमाना सा निशान्तं जगाम प्रत्यावरीवृत्यत च। यथा काचिद्-बालिका तस्याः पक्षिणं सकृन्मुञ्चति, पुनस्तं क्षौमसूत्रेणाकर्षति तथा नलिन्या वसन्तत्यागे द्विधाभूतमासीन्मानसम्। वसन्तोऽपि तस्या अन्तिकादुच्चलितुं नाभिलाषी जातः। यतो रात्रौ सुसङ्गीतायतेऽन्योन्यवाक्छ्रवणं हि प्रण-

यिनोः। परन्तु परिशेषतः प्रभातकल्पायां यामवत्यां तौ सुखशिशयिषू आरिरंसू च मिथ आपृच्छेताम्।

वसन्तस्तत्प्रणयिनीगतचिन्ताशतैर्बध्यमानहृदयः सञ्जातः। स ईदृक् सुखसमागमचिन्तायां न्यमाङ्क्षीद् यत् स्वगृहे गन्तव्येऽनन्तव्रतेन नाम केनचित्तापसेनाभ्यर्णाश्रमनिवासिना सार्धं साक्षात्कारं कर्त्तुमयासीत्। असौ धार्मिकस्तपोधनः प्रागेव विमुक्तशयन उपासनायां दत्तमना आसीत्। ईदृश्येव महति प्रत्यूषसि बहिर्वसन्तमालोक्य "विनिद्रेनानेन गमिता विगतत्रियामे"त्येवं तस्य विकल्प आसीत्।

यौवनसुलभप्रणयातिशयो हि तमजागारयदिति तस्य विकल्पो नाम। स्थाने नाभूत्तस्य विकल्पः प्रणयिनीमन्तरेण। यतः काञ्चनप्रभायाः कृते तस्य रात्रा अपि निकामं शयितव्यं नासीदिति सोऽवालुलोचे। यदा तु वसन्तस्तदन्तिकं नलिनीगततदभिनवप्रणयविषयं प्रकाशीकृतवान्, तस्मिन्नेवाह्नि च तयोर्विवाहकार्यसम्पादनाय तमनुरुरोध तदासौ धार्मिकस्तापसो वसन्तप्रणयस्येदमाकस्मिकं परिवर्त्तनं निर्वर्ण्य केनचिदसंस्तुतविस्मयेन हस्तनयनं समुदनीनमत्। यतो विदित आसीत्तापसेन खलु काञ्चनप्रभागतप्रणयो वसन्तस्य। वसन्तेन तदन्तिकं काञ्चनप्रभाया अवधीरणाविषयस्यानुयोगः कृतः।

"यूनः प्रेम हि चेतसो न जायते परन्तु चक्षुर्भ्यामुत्पद्यत" इति सोऽव्रोचत।

"मयि काञ्चनप्रभा नानुरक्ताऽपि तस्यां बद्धानुरागत्वाद् बहुशोऽहं त्वया न्यक्कृतोऽभूवमिति प्रत्यभाषत वसन्तः। 'नलिन्यहञ्च द्वावेव मिथोऽनुरक्ता'वित्यपि वसन्तेनोचे तापसः। तच्छ्रुत्वाऽनन्तव्रतः कथञ्चित्तमन्वमोदिष्ट।

———

धर्ममीमांसा

[निबन्धकः—श्रीगोपालकृष्ण-वेदान्ततीर्थः]

ॐ नमः परमदेवतायै

चण्डीचरणजातेन गोपालकृष्णशर्मणा ।
यच्चण्डीचरणात् प्राप्तं तच्चण्डीचरणेऽर्पितम् ।।

तत्राऽऽदौ धर्ममीमांसायां विवेक्तव्यायां प्रथमं धर्मशब्दार्थो व्याख्यायते । पदार्थानाम् इतरव्यवच्छेदकत्वापादको धर्मः । स च परस्परविभागेण विधायकस्वरूपः । तदितरावृत्तित्वे सति तद्वृत्तित्वरूपो वा । यथाऽग्नेरौष्ण्यमपां शैत्यमित्यादि । धर्मश्च द्विविधः साधारणधर्मो विशिष्टधर्मश्चेति । तद् यथा गोः पुच्छशृङ्गादिमत्त्वं साधारणधर्मः मेषादावपि तत्सत्त्वात् । गलकम्बलवत्त्वञ्च विशिष्टधर्मः तदनन्यसाधारणत्वात् । मानवानाञ्च मानवत्वं विशिष्टो धर्मः । स च विलक्षणो विवेक इति प्रतिभाति । विलक्षणत्वञ्चात्र स्थूलशरीरोपाधिकजीवाश्रितत्वम् तेन गन्धर्वदेवतादौ नातिव्याप्तिः । तदृश्यविवेकस्यैव मानवानां विभाजकत्वात् मौनवत्त्वे विधारकत्वाच्च । तथाहि "धृ"धातोः करणे "मनिच्" प्रत्यये धर्मशब्दस्य साधुत्वम् । भारतेऽपि "धारणाद्धर्ममित्याहुरि"त्यादिवाक्यात् करणे विहित एव धर्मशब्द इति प्रतिपादितम् । तथाच धारयत्यात्मानं येन स धर्मः इति धर्मशब्दार्थः । यद्यपि मानवानां विवेक एव विशिष्टो धर्मस्तथापि विवेकोत्पन्नमहिंसासत्यादिकमेव लक्षणया धर्मशब्देन व्यवहरन्ति प्रज्ञावन्तः ।

यद्यपि ब्राह्मणादीनां वर्णानां ब्रह्मचर्याद्याश्रमाणाञ्च धर्मवैशिष्ट्यं वर्त्तते तथापि सर्वेषामेव वर्णानाम् आश्रमिणाञ्च साधारणो धर्मोऽस्ति यः साधारणविवेकोत्पन्नः सर्वै रेवानुष्ठेयः । तेन वर्णधर्माणामाश्रमधर्माणाञ्च निर्देशात् प्राङ्-मानवो धर्म ऋषिभिः प्रतिपादित उच्यते । अत्र मनुः—अहिंसा सत्यमस्तेयं

शौचमिन्द्रियनिग्रहः। एतत् सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥"

अहिंसा च हिंसात्यागः। "अथ मत्स्यघातो निषादानाम्" इत्यादिवाक्यात् येषां हिंसैव जीविकाहेतुत्वेनोपदिष्टा तेषामहिंसा कथं सम्भवति इति चेन्मैवम् तेषां हिंसाया जीविकात्वेऽपि तस्या न्यूनाधिकतया पापं जायत एव, सर्वथैव हिंसाया दोषजनकत्वात्। सति सम्भवे हिंसाविरहितं शास्त्राविरुद्धक्रत्वन्तरग्रहणं तेषां धर्मायैव भवति। सर्वमेतद् वैधहिंसाप्रकरणे स्फुटीभविष्यति। सामासिकमिति संक्षेपतः सर्ववर्णसर्वाश्रमसाधारणम्। विष्णुरपि—

क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया।
आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा सामान्यधर्म उच्यते।

इति। आर्जवं सरलता, गुणेषु दोषाविष्करणमभ्यसूया तदभावोऽनभ्यसूया, ननु अहिंसादीनां धर्मजनकत्वं सर्वैरेव साम्प्रदायिकैरङ्गीकृतम्। न चास्त्यत्र कश्चिद्विरोधो विवेकवतां देशभेदे कालभेदे वा। तत् कथं तदर्थं मीमांसाग्रन्थप्रणयने प्रचेष्टा भवतामिति। सत्यम्, अस्त्यत्रान्यत् प्रयोजनं मीमांसाग्रन्थप्रणयनस्य। यतो ये नाम मानवानां हिंसादयः साधारणधर्मा उक्तास्तत्र विरोधाभावेऽपि वर्णाश्रमलक्षणे विशिष्टधर्मे विभिन्नप्रवृत्तीनां तीर्थकराणामस्ति सहस्रशो विरोधः। तथाहि

न मांसभक्षणे दोषो न मद्ये न च मैथुने

इत्यादिमनुवाक्यात् मद्यपानस्य दोषाभावत्वकथनेऽपि

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः

इत्यादिवाक्येन मद्यपानस्य महापातकत्वमुक्तम्। अहिंसा सत्यमस्तेयमित्यादि वाक्ये अहिंसायाः साधारणमानवधर्मत्वेऽपि "मत्स्यघातो निषादानाम्" इत्यादिवाक्येन निषादानां मत्स्यघातस्य जीविकात्वात् तेन तेषां पापं जायते न वेति सन्देहः। तथा वैधहिंसयापि पापमुत्पद्यते इति केचित्

सिद्धान्तितम् । नैव जायते तस्या विधिबोधितत्वादिति केषाञ्चिन्मतम् । ततश्च सन्देहविरोधादिनिराकरणाय धर्मशास्त्रस्य मीमांसा कर्तव्येति नैषा व्यर्थप्रचेष्टेति ।

दत्ता

चतुर्थः परिच्छेदः

चिरोज्झितं भूस्वामिनो भवनं विलासस्य तत्त्वावधायकतया संस्कारमनुभवदासीत् । कलिकाताताेऽदृष्टपूर्वाणि प्रसाधनद्रव्याणि गोयाने पूर्यमाणानि नित्यमागन्तुमुपाक्रामत । भूस्वामिन एकैव दुहिता स्वदेशे वस्तुमागमिष्यतीति प्रचरन्त्यामेव प्रवृत्तौ न केवलं कृष्णपुरे राधापुर-व्रजपुर-दीघडाप्रभृतीनामुभयतः पार्श्ववर्त्तिनां पञ्चसप्तानां ग्रामाणां मध्येऽपि महान् कोलाहलः पदमकरोत् । स्वत एव गृहपार्श्वे भूस्वामिनो वासश्चिरमेव जनानामप्रियस्ततश्च भूस्वामिनस्तत्रानवस्थानमेव प्रजानां परिचितमासीत्, अतो नवीना तस्य निवासवासना सर्वेषामेव समीपे कश्चिन्नयायादनपेत उत्पात इव प्रत्यभात् । कर्मनिष्पादकस्य रासविहारिणः प्रबलेन शासनेन नासीत्तासां दुःखानां विरतिः, भूयश्च स भूस्वामिदुहितुः शुभागमनमुपलक्ष्य कान् नाम नवीनानुपद्रवान् स्रक्ष्यतीति तदिदं हट्टे क्षेत्रे घट्टे सर्वत्रैव एकस्या अमङ्गल्याया आलोचनाया विषयः समभवत् । परलोकवासी वृद्धो भूस्वामी वनमाली यावन्ति दिनानि जीवन्नवर्तते, तदा दुःखेष्वप्ययं सुखलव आसीत्—येन केनचित् प्रकारेण कलिकातायामुपेत्य तत्सकाशमुपसेदुषो नासीत् कस्यापि निष्फला प्रत्यावृत्तिरिति । परं भूस्वामिकन्यकाया नवीनं वय उष्णञ्च मस्तकम्, रासविहारिणः सुतेन समं विवाहस्य

जनश्रुतिरपि नासीद् ग्राममध्ये निगूढा। सा आङ्गलरमणीव म्लेच्छाचारा, अतोऽदूरभविष्यति काले रासविहारिणो दौरात्म्यं कल्पयतः कस्यापि मनसि कियदपि सुखं नासीत्,—यज्ञोपवीतं बिभ्रतो ब्राह्मणस्यापि न, तद्विहीनस्य शूद्रस्यापि न। एवं भयेन भावनया च प्रावृड् व्यतीता। शरदुद्गम एव कस्मिंश्चिन्मधुमये प्रभाते उच्चैस्तरेण 'ओयेलार'युगलेन वाहितं निरावरणं यानमधिरुह्य तरुणी भूस्वामिदुहिता शतशो नराणां सभयकौतूहलाया दृष्टेर्मध्यत इव हुगल्या बाष्पीयशकटावतरणस्थानात् पितृपितामहानां पुरातनं वासभवनमुपासीदत्।

वङ्गीयस्य कन्यका,—अष्टादशोनविंशानि वयांस्यतीतानि, तथापि विवाहो नासीत्,—सा सप्रकाशम् उपानहं पादत्राणञ्च परिधत्ते, खाद्याखाद्ये न विचारयति—इत्याद्याः कुत्सा ग्रामीणा गूढं प्रावर्त्तयन्, अथ च भूस्वामिनो दर्शनीयमुपादाय एकशो द्विशश्च समेत्य नानाविधानानन्दान् मङ्गलाभिलाषांश्च विज्ञापयन्तः प्रस्थिताः। इत्थमतिक्रामत्सु पञ्चषेषु दिनेष्वेकदा प्रातर्विजया 'चा'पानानन्तरं निम्नतलस्थे उपवेशनगृहे विलासमहोदयेन साकं वैषयिकीः कथाः कुर्वती स्थिता, भृत्यः समुपेत्य व्यज्ञापयत्—कोऽपि भद्रो जनः साक्षात्कारमिच्छति। विजयया प्रोक्तम्—अत्रानीयताम्।

एतानि कियन्तिचिद्दिनानि तस्या भद्राभद्राः प्रजा उपायनान्युपादाय यदा-तदा साक्षात् कर्त्तुमुपतिष्ठन्ते अतः सा प्रथमतः किञ्चन विशेषं नामन्यत किन्तु क्षणात् परं यो भद्रो जनो भृत्यस्य पश्चाद् गृहं प्राविशत् तं प्रति दृष्टिपातमात्रत एव विजया विस्मिता संवृत्ता। तस्य वयो मन्ये चतुर्विंशतिः पञ्चविंशतिर्वा भवेद्वर्षाणाम्। दीर्घकायः स न तु तदनुपाततो हृष्टपुष्टः, परं क्षीणकायः। उज्ज्वलगौरो वर्णः, श्मश्रु गुम्फश्च संस्कृते। पादयोश्चर्मोपानहौ, देहे अङ्गरक्षणी नास्ति, केवलं कस्यचित् स्थूलस्य प्रावरणस्यान्तरालाच्छुभ्रस्य यज्ञोपवीतस्य गुच्छो दृश्यते। स क्षुद्रमेकं नमस्कारं विधाय काञ्चनाऽऽसन्दिकामाकृष्योपाविशत्। इतः पूर्वं यः कोऽपि

भद्रो जनः साक्षात् कर्त्तुमागतवान्, स न केवलं दर्शनीं मुद्रामेव पाणौकृत्य प्राविशत् परं कुण्ठितकुण्ठित इव प्राविशत्। अस्य जनस्याऽऽचरणे तु कुण्ठाया लेशोऽपि नासीत्। तस्याऽऽगमनेन न केवलं विजयैव विस्मिता, विलासोऽपि नाल्पं व्यस्मयत। यद्यपि विलासस्य निवासो ग्रामान्तरमेव, तथापि एतद्दिश्यान् सर्वानेव भद्रजनानजानात् सः; परमयं युवा तस्य सर्वथाऽपरिज्ञातः। आगन्तुर्भद्रजन एव प्रथमतो वाचं प्रावर्त्तयत्, तेनोक्तम्—मम मातुलः पूर्णगाङ्गुलिमहोदयो भवत्याः प्रतिवासी, पार्श्वतो भवनमेव तस्य। श्रुत्वाऽहं निर्वचनः सम्पन्नो यद् भवत्या किल तस्य पितृपैतामहं दुर्गार्चनमस्मिन् संवत्सरे निरोद्धुमिष्यते। अस्य कोऽर्थः। उक्त्वा स विजयाया मुखं प्रति दृष्टिं न्यबध्नात्। प्रश्नेन, तस्य जिज्ञासाभङ्ग्या च विजया विस्मिता मनसि विरक्ता चाभूत्, परं न प्रत्युत्तरमकरोत्।

विलासस्तस्योत्तरमदात्। स रूक्षेण स्वरेणावदत्, भवान् किल तत एव मातुलगृह्यः सन् कलिं कर्त्तुमुपागतवान्? परं केन साकमालप्यत इति न विस्मर्त्तव्यं भवता।

आगन्तुर्विहस्य दशनेन रसनां निरुध्याब्रूत, नाहं तत् प्रास्मरम् न च कलिं कर्त्तुं प्राप्तवान्, प्रत्युत वचस्यस्मिन् विश्वासो मे नाभवदिति सम्यग् ज्ञातुमुपागच्छम्।

विलासः परिहासभङ्ग्याऽकथयत्, कथं विश्वासो नाभवत्?

आगन्तुरवदत्, उच्यतां कथं भविष्यति? मुधैवात्मनः प्रतिवासिनो धर्मविश्वासे प्रहरिष्यतीत्यत्राविश्वास एव स्वाभाविकः।

धर्ममतमधिकृत्य तर्कवितर्कौ शैशवादेव विलासस्यात्युपादेयौ। स उत्साहात् प्रदीप्तः सन् गूढोपहासतरलेन कण्ठेनावदत्, भवता निरर्थकत्वे ज्ञात एव यदन्यस्य कस्यापि सविधे तस्यार्थो न भविष्यति, अथवा भवता धर्म इत्युक्त एव सर्वे तं शिरोधार्यं मंस्यन्ते इत्यस्य नास्ति कोऽप्यर्थः। पुत्तल्यर्चना नास्माकं धर्मस्तस्याः प्रतिषेधश्च न वयमन्याय्यं मन्यामहे।

आगन्तुर्गभीरेण विस्मयेन विजयाया मुखं प्रति दृष्टिं निबध्योक्तवान्, अपि नाम भवत्यापि तदेवोच्यते ?

प्राहरदिव तस्य विस्मयो विजयाम्। परं सा तं भावं निगुह्य स्वाभाविकेनैव स्वरेण प्रतिवचनमकरोत्, अपि नाम भवता मत्तोऽस्य विरुद्धमभिमतं श्रोतुमभिलषता समुपागतम् ?

विलासेन सोत्सेकं विहस्योक्तम्, शङ्के। परमत्रभवान् देशान्तरवासी भवतीनां किमपि न जानातीति दृढं सम्भाव्यते।

आगन्तुः क्षणं तूष्णीं विजयाया मुखमालोक्य तामेवोक्तवान, यद्यपि नाहं वैदेशिकस्तथापि नैतद्ग्रामवासीति सत्यम्। तथाप्यहं वस्तुगत्यैव भवत्याः सकाशे नेदमाशासे स्म। अनिःसृतायामपि भवत्या मुखतः पुत्तल्यर्चनेति भाषायाम् साकारनिराकारयोरुपासनायां चिरन्तनं वादं नाहमत्रावतारयिष्यामि। भवत्यः ब्राह्मसमाजीया इत्यप्यहं जानामि। परं नेदं तत्। ग्रामस्यान्तरियमेकैव पूजा। सर्वे जनाः पूर्णं वत्सरमेतेषां त्रयाणां दिनानामाशापथमालोकयन्तो वर्त्तन्ते, इत्युक्त्वा पुनर्वारमेकं तीक्ष्णां दृष्टिं निपात्य तेन प्रोक्तम्, ग्रामोऽयं भवत्याः,—प्रजास्तावद् अत्रभवत्या अपत्यतुल्याः ; भवत्या आगमनेन साकं ग्रामस्याऽऽनन्दोत्सवः शतगुणं वर्धिष्यत इत्येव सर्वे आशासते। परं तद्दूरेऽस्तु एतावदमन्दं दुःखम् एतावन्तममन्दं निरानन्दश्च विनाऽपराधेन भवत्या दुःखितानां प्रजानां शिरःसु स्वयमारोपयिष्यतीति किमिदं विश्वसितुं योग्यम्। मया तु विश्वसितुं न शक्यते।

विजया सहसा नोत्तरयितुमशक्नोत। दुःखितानां प्रजानां नाम्ना तस्याः कोमलं चित्तं व्यथया पूर्णमभवत् ; क्षणं कोऽपि किमपि वक्तुं न प्रबभूव। केवलं विलासमहोदयो विजयाया निःशब्दं स्नेहार्द्रञ्च मुखमवलोक्यान्तः सोष्मा सोद्वेगश्च अवहेलनभङ्ग्या वाक्यमुदैरयत, बहु भाषते भवान्। साकारनिराकारयोस्तर्कं भवता साकं कर्त्तुं नास्माकं पर्याप्तः समयः। यातु नाम तच्चुल्याम्, आस्तामेका, शतं शालभञ्जिका निर्माय गृहे वसन् पूजयतु

भवतो मातुलः, तत्रापि न कापि विप्रतिपत्तिः, केवलं कानिचन पटहमृदङ्गकां स्यान्यहोरात्रमस्याः कर्णसन्निधौ प्रध्मायास्वास्थ्योत्पादनायामेवास्माकं विप्रतिपत्तिः।

आगन्तुः स्मित्वा प्रावदत, न तावदहोरात्रं वाद्यते। परं सर्वस्मिन्नेवोत्सवे कश्चन कलकलो भवतीत्युक्त्वा विशिष्य विजयामुद्दिश्य प्रावोचत, अथ भवेच्चेत् किञ्चन दौःस्थ्यं, भवतु नाम। मातृजातीया भवत्यः, एषामानन्दस्योपद्रवो भवत्या चेन्न सह्यते केन तर्हि सोढव्यः ?

विजया तथैव निरुत्तरा व्यराजत। विलासः सोत्प्रासं शुष्कहासं हसित्वाऽवदत्, भवता तु स्वकर्म छलेन साधयितुं पुत्रकन्ये उपमीकृते, श्रोतुमपि नारमणीयमभूत परं पृच्छयते, भवान् स्वयमेव यदि माहम्मदीयो भूत्वा मातुलस्य कर्णाभ्यर्णे 'महरमं' प्रारप्स्यत अपि नाम तत्तेन शोभनममंस्यत। तन्नाम तद् भवतु, वादप्रतिवादयोर्नास्त्यस्माकमवसरः, यो हि नामाऽऽदेशस्तातपादैः प्रदत्तः स एवाव्याहतस्तिष्ठति। कलिकातातः स्वदेशमानीय व्यर्थं राशीभूतानां पटहमृदङ्गकास्यानां वादनेनास्याः कर्णयोर्मस्तकभक्षणं न वयमनुमोदिष्यामहे। कथमपि न।

तस्य असभ्यजनोचितेन नर्मभाषितेन उष्मण आतिशय्येन चाऽऽगन्तुकस्य नेत्रयोर्दृष्टिः प्रखरा संवृत्ता। स विलासस्य मुखं प्रति नेत्रे निपात्याभिहितवान, को हि नाम भवतः पिता कथंकारं च सोऽधिक्रियते प्रतिषेध इति न ममास्ति विदितम्, परं येयं भवता विचित्रा महरमस्योपमा समुपस्थापिता—तत्र श्रूयतामस्माभिर्यदीदं हिन्दूनां 'रसुनचौकी'त्वमनासादयदेव माहम्मदानां तस्यैव महरमस्य पटहवाद्यं सभविष्यत्तदा तेन भवता किमकरिष्यत ? तदिदं निरीहं स्वजातीयं प्रत्युपद्रवादन्यन्न किमपि।

सहसा विलास आसन्दिकामपास्य सोल्लम्फमुदतिष्ठत्। शोणनेत्रो भीषणेन कण्ठेनोच्चैरवोचत, मम पितुर्विषये त्वया सावधानेन सताऽभिधातव्यम् इति त्वां ब्रवीमि, नोचेदधुनैवोपायान्तरेण शिक्षयिष्यामि कः सः, को वा तस्याधिकार इति।

चित्रीयमाणेनागन्तुकेन विलासस्य मुखं प्रति नेत्रे प्रणिहिते, परं भयस्य चिह्नमपि तस्य मुखे नालक्ष्यत, अलक्ष्यत च विजयाया मुखे। तस्या गृहमध्यमध्यासीनं तस्या एव कञ्चनातिथिं प्रत्येवंविधेनैकान्ततोऽशिष्टोचितेनाचरितेन तस्या मुखमण्डलं कोपलज्जाभ्यामारक्तमभूत्। आगन्तुर्मुहूर्त्तमात्रं विलासस्य मुखं प्रति दृष्टिं क्षिपन्नास्त, समनन्तरमेवैकान्ततस्तमुपेक्ष्य विजयां प्रति नेत्रे परावर्त्यावदत्, मम मातुलो न धनवान् जनः, तस्य देवार्चनायाः समारम्भोऽपि स्वल्प एव। तथापि भवत्या दरिद्रासु प्रजास्वयमेक एव सार्ववात्सरिक आनन्दोत्सवः। भवेदपि नाम भवत्याः किमप्यसौकर्यम्। परं तासामनुरोधेन किमियन्मात्रं भवत्या सोढुं न शक्ष्यते।

क्रोधेनोन्मत्तो विलासः सम्मुखस्थायां त्रिपद्यां प्रचण्डं मुष्ट्याघातं विधाय चीत्कारमारचयत्, नहि, न शक्ष्यते, शतकृत्वो [ब्रवीमि] नैव शक्ष्यते। केषाञ्चन मूर्खकर्षकाणामुन्मत्ततां सोढुं न केऽपि भूम्यधिकारितां परिचालयति। तव वक्तव्यान्तरं न वर्त्तेत चेत्त्वमपसर,—मा नामास्माकं समयमपार्थमपचिनु। उक्त्वा स हस्तेन द्वारमुपादिशत्। तस्यात्यन्तमुद्रिक्तया समुत्तप्ततया समागतो भद्रमुखः क्षणं मूढधीरिवासीत्। परं पितुः सकाशाद् विजया न निष्फलां शिक्षामध्यकरोत्। सा शान्तमचञ्चलञ्च विलासस्य मुखमालोक्यावदत्, भवतस्तातपादा मयि दुहितरीव स्निह्यन्तीति कृत्वा एतेषां देवार्चनां न्यषेधत्, परं मयोच्यते, भवतु नाम त्रिचतुराणि दिनानि कश्चन कोलाहलः—

वाक्यशेषमाक्षिप्यैव विलासस्तथैवोच्चस्वरेण प्रत्यवदत्—असहनीयः स कोलाहलः! भवत्या न ज्ञायते इत्येव—

विजया सहासवदनेनावोचत्, कामं भवतु कोलाहलः,—न तु दिनत्रयं विना। अपि च भवता ममासौकर्यं चिन्त्यते परमुच्यताम् कलिकाता चेदभविष्यत्तदा किमकरिष्यद् भवान्? तत्राष्टौ प्रहरान् कर्णयोः समीपे केनापि खधूपे मुक्तेऽपि निःशब्दं सोढव्यमासीत। उक्त्वा समागतं युवानं प्रत्यालोक्य हसन्ती प्राह स्म, भवतो मातुलो ज्ञाप्यताम्, तत्रभवान् प्रत्यब्द-

मिवास्मिन्नपि वर्षे पूजां विदधातु, मम बिन्दुमात्रापि विप्रतिपत्तिर्नास्ति।

समागतो विलासश्चोभौ विस्मयवीतवाचौ विजयाया मुखमालोकयन्तावासाताम्।

आपृच्छे तावद्भवन्तमित्युक्त्वा विजया क्षुद्रमेकं नमस्कारमारचयत्। अपरिचितो भद्रलोकोऽप्यात्मानं पर्यवस्थापयन्नुदतिष्ठत धन्यवादं प्रतिनमस्कारञ्च विधाय विलासायापि नमस्कारमेकं विज्ञाप्य शनैर्निरगात्। वाढं क्रुद्धो विलासो दिगन्तरे चक्षुषी परावर्त्य तमवाधीरयत्; परं द्वयोरेकोऽपि नाज्ञासीद् यदयमपरिचितो युवैव तेषां प्रधानतमस्याभियुक्तस्य पुत्रो नरेन्द्रनाथः।

———

श्रीरामरहस्यम्

—:०:—

[निबन्धकः—श्रीशरत्कमल-न्याय-स्मृतितीर्थः]

(१)

अथात्र श्रूयते—

"रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥"

श्रीरामपूर्वतापिन्युपनिषत् ।६।

"योगिन"-श्चित्तवृत्तिनिरोधकारिणः, "अनन्ते" (१) "नित्ये" (२) "आनन्दे" (३) "चित"स्वरूपे (४) "आत्मनि" (५) "रमन्ते" स्वरूपेण अवतिष्ठन्ते यत इति हेतो रामपदेन "परं ब्रह्म" एव "अभिधीयत" इत्यर्थः । एवञ्च श्रीरामः "अनन्तः" (१) "नित्यः" (२) "आनन्दः" (३) "चित्-स्वरूपः" (४) "आत्मा" (५) "परञ्च ब्रह्म (६) इति तत्त्वं पर्यवसितम् ।

(२)

अनन्तत्वमृचा व्याख्यातं यथा—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥*

ऋग्वेदीयपुरुषसूक्तप्रथममन्त्रः ।

अत्र सहस्रशब्दः अनन्तत्वोपलक्षकः, तथाच पुरुषस्य शिरआदीनि सर्वाणि अनन्तानि वेदितव्यानि । एतेन पुरुषस्य नामरूपमहिमादीनि

---

* "सर्वतः स्पृष्ट्वा" (१) "सर्वतः स्पृक्त्वा" (२) इत्यादिपाठान्तरं निपुणैः प्रणिधातव्यम्, वेदभेदेन मन्त्राणां पाठान्तरकारणमपि समाधानीयम् ।

अनन्तानि भावनीयानि इत्युपदिष्टं भवति ; तादृशभावनया साधकस्य तत्-स्वरूपप्राप्तिर्भवत्येव,

"स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति"

अथर्ववेदीयमुण्डकोपनिषत् ।३।२।९।

इत्यादिश्रुतेः । "पुरुष" शब्देनापि—"अनन्तत्वं" व्याख्यातं वेदितव्यम्

"स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः,
नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम्"

शुक्लयजुर्वेदीयबृहदारण्यकोपनिषत् ।२।५ १८

इत्यादिश्रुतेः । तथाच सान्तस्य सर्वासु पूर्षु अवस्थानासम्भवादनन्तत्वं सुव्यक्तमेव । "विश्वतो वृत्वा" इत्यनेनाप्यनन्तत्वं व्याख्यातम्, सान्तस्य विश्व-वरणासम्भवादिति प्रणिधातव्यम् । "सर्वतः स्पृष्ट्वा" इत्येतस्मिन् पाठेऽप्यनन्तत्वम्, सान्तस्य सर्वस्पर्शाभावात् ।

उपनिषद्भिश्च—अनन्तत्वमेवं व्याख्यातम् , यथा—

(१) "इदं महद्भूतमनन्तमपारम्"—इत्यादि ।

(२) "सत्यं ज्ञानमनन्तं ब्रह्म"—इत्यादि ।

(३) "सर्वकामः सर्वरसः सर्वगन्धः सर्वकर्मा"—इत्यादि ।

छान्दोग्योपनिषत

अत्र सर्वशब्देन अनन्तत्वं व्याख्यातमिति प्रणिधातव्यम् । अपि च श्रूयते—

(४) यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद् विविधाः सौम्य ! भावाः
प्रजायन्ते यत्र चैवापियन्ति ॥ इत्यादि

अथर्ववेदीयमुण्डकोपनिषत् ।२।१।१।

अत्र कार्याणां भावानामनन्तत्वात् कारणस्याक्षरस्यानन्तत्वमनुमेयम् । विविधत्वं नानाप्रकारत्वमनन्तत्वमिति फलितार्थः । तथा च एतत् सर्वं

श्रीराम एवेति प्रकृते विभावनीयम् । तदेवं मन्त्रब्राह्मणयोरैक्येन श्रीरामस्यानन्तत्वं व्याख्यातमित्यवधेयम् ॥*

"नित्ये—उत्पत्तिध्वंसरहिते त्रिकालाबाधिते, षड्भावविकारातीत इत्यर्थः। भावविकारानाह महर्षिर्वार्ष्यायणिर्यथा "जायते" (१) "अस्ति" (२) "वर्द्धते" (३) "विपरिणमते" (४) "अपक्षीयते" (५) "नश्यति" (६) इति।

---

* अत्रेदमवधातव्यम्—"न क्षरती"ति व्युत्पादनादक्षरशब्देन ब्रह्मैवोच्यते, तच्च प्रणववाच्यम्; तथाच श्रूयते—

(१) "सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद् वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ।।"

कृष्णयजुर्वेदीयकठोपनिषत् ।१।२।१५।

(२) "तस्मै स होवाच—एतद् वै सत्यकाम ! परञ्चापरञ्च ब्रह्म यदोङ्कारः"—

अथर्ववेदीयप्रश्नोपनिषत् ।५।२।

(३) "एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥"

कठोपनिषत् ।१।२।१६।

स्मर्यते च

(१) "ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः"

श्रीमद्भगवद्गीता ।१७।२३।

(२) "तस्य वाचकः प्रणवः"।

पातञ्जलदर्शने समाधिपादे २८ सूत्रम्

प्रकृते तु एतदक्षरं श्रीराम एवेति विभावनीयम् ॥

निरुक्ते उपोद्घातप्रकरणे भावविकारनिरूपणं द्रष्टव्यम् ।

तथाच श्रूयते—

"न जायते म्रियते वा विपश्चि-
न्नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥" इत्यादि

कृष्णयजुर्वेदीयकठोपनिषत् ।१।२।१८।

स्मर्यते च

"न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥"

श्रीमद्भगवद्गीता ।२।२०।

तथाच कालातीते इति फलितम् । तदेतत् कालातीतं नित्यं वस्तु स्मरति महर्षिः पतञ्जलिः—

"स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ।"

योगदर्शनम्, समाधिपादे—२७ सूत्रम् ।

"स" नित्यं वस्तु परमेश्वरः, "पूर्वेषा"मपि गुरूणां ब्रह्मादीनामपि गुरुः वेदशास्त्राद्युपदेष्टा इत्यर्थः । अत्रेयं श्रुतिर्मूलम्—

"यो ब्रह्माणं विदधाति पूर्वम्
यो वै वेदांश्च प्रहिणोति तस्मै"—इत्यादि

श्वेताश्वतरोपनिषत् ।६।२८।

ऋचाऽभ्युक्तश्चैतत—

"यं यं कामये तं तमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम्"—इति

ऋग्वेदीयदेवीसूक्तपञ्चममन्त्रः । ऋग्वेदसंहिता—८।७।११।१

स्मरति च महर्षिव्यासः—

"तेने ब्रह्म हृदा य आदिकवये"—इत्यादि ।

श्रीमद्भागवते प्रथमश्लोकांशः

तथाच—

"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" एव नित्यं वस्तु, "तत्र निरतिशयं सर्वज्ञत्वबीजम्" इत्यादि * सर्वं श्रीराम एव विभावनीयमिति प्रकृतम् ।

आनन्दे इति—"आनन्दं ब्रह्मेति व्यजाना"दिति श्रुतिः । तथाच "बृहत्त्वाद् बृंहणत्वाद् वा ब्रह्मैव आत्मा इत्यभिधीयते" इति ब्रह्मशब्दस्य व्युत्पादितत्वाद् ब्रह्मपदार्थो बृहन्—परममहान सर्वगतो देहादीनां परिणमयिता आत्मस्वरूपश्च फलितः, तथाच आनन्दस्यापि ब्रह्मत्वाद् आत्मस्वरूपश्चेति विभावनीयम्, स एव श्रीराम इति प्रकृतम् । तथाच श्रीरामस्याऽऽनन्दस्वरूपत्वाच् श्रीरामोऽपि बृहन् परममहान् सर्वगतो देहादीनां परिणमयिता आत्मस्वरूपश्च इति रहस्यमुपासनीयम् ।

अपि च श्रूयते "आनन्दं ब्रह्मणो विद्वान न बिभेति कुतश्चन्"—इत्यादि ।† तथाहि "ब्रह्मण आनन्द" मिति "राहोः शिरः"(१) "सवितुर्भर्गः" (२) इत्यादिवदभेदे षष्ठी, एवञ्च ब्रह्माभिन्नमानन्दम्, आनन्दाभिन्नं वा ब्रह्म, "विद्वान्" जानन् "कुतश्चन" अपि कारणान्न "बिभेति"

---

* योगदर्शने समाधिपादे ईश्वरलक्षणसूत्राणि द्रष्टव्यानि । गीतोपनिषदोः पाठान्तरकारणमपि भावनीयम् ।

† तैत्तिरीयके ब्रह्मानन्दवल्ली (१) वेदान्तदर्शने आनन्दमयाधिकरणम् (२) बृहदारण्यकोपनिषदि ४।३।३२—३३ मन्त्रसन्दर्भौ (३) इत्येतानि सर्वाणि द्रष्टव्यानि ; तत्तच्छास्त्रदर्शनेन हि ब्रह्मण आनन्दरूपत्वं सुव्यक्तीभविष्यति । अपि चात्र "ब्रह्म नानन्दरूपम्, किन्तु आनन्दवत्"—इत्यादि द्वैतवादिनामनुभववैशिष्ट्यं प्रणिधातव्यम् ।

इत्यर्थः। एतेन आनन्दरूपस्य ब्रह्मणोऽभयत्वं व्याख्यातम्—"अभयं वै जनक ! प्राप्तोऽसि" (क) "ब्रह्माभयं वै, ब्रह्माभयं वै" (ख) इत्यादि श्रुतेः। व्याख्यातञ्च आनन्दस्वरूपेण पुरुषेण स्वयमेव—

"सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥"

वाल्मीकिरामायणे लङ्काकाण्डे—१८।३३।
अध्यात्मरामायणे लङ्काकाण्डे—३।१२।

"अभयं मे स्वरूपं शरणागतभक्तेभ्यः प्रकाशयामि" इत्यभिप्रायः।

'आनन्दं ब्रह्मणो विद्वान् न बिभेति "कदाचन" ' इति पाठान्तरं श्रूयते, तथाच एतस्मिन् पाठे "तादृशब्रह्मविदः कस्मिन्नपि काले भयं न भवति, तस्याभयाभिन्नब्रह्मस्वरूपत्वात्।"

अपि च श्रूयते—

(१) "एषोऽस्य परम आनन्द एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति।" इत्यादि—

बृहदारण्यकोपनिषत्। ४।३।३२

(२) "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते;
आनन्देन जीवन्ति, आनन्दमभिसंविशन्ति" इत्यादि।

सूत्रितञ्चैतत्—शारीरके भगवता बादरायणेन

"आनन्दमयोऽभ्यासात्"—इत्यादिभिः।

वेदान्तदर्शनम्। १।१।१२-१९ सूत्राणि द्रष्टव्यानि।

तदेतत् सर्वं तैत्तिरीयके ब्रह्मानन्दवल्ल्या व्याख्यातमवगन्तव्यम्, पर्यवसितञ्च सर्वं श्रीराम इति प्रकृते विभावनीयम्।

"चित्स्वरूपे"—इत्यादि। तदेतच्चिद् वस्तु मातृरूपेण स्मृत्वा प्रणमन्ति—

(२) "चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ श्रीचण्डी ७८, ७९

इत्यादिमन्त्रोऽत्र द्रष्टव्यः।

(१) "या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"

श्रीचण्डी ५।१७-१८-१९

अपि च एतदेव चिद्वस्तु श्रुतिभिः पुरुषत्वेन (१) विश्वव्यापित्वेन (२) अन्तर्यामित्वेन (३) आत्मत्वेन (४) अमृतत्वेन च (५) व्याख्यातम्। तथाच श्रुतिः—

(१) "स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः
नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम्। इत्यादि

बृहदारण्यकोपनिषत् ।२।५।१८

अत्र पुरुषत्वं विश्वव्यापित्वं सुव्यक्तमेव। अपि च श्रूयते—

(२) यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः, पृथिवी यं न वेद, पृथिवी यस्य शरीरम्, यः पृथिवीमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(३) योऽप्सु तिष्ठन् अद्भ्योऽन्तरः, आपो यं न विदुः, आपो यस्य शरीरं, योऽपोऽन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(४) योऽग्नौ तिष्ठन् अग्नेरन्तरः, अग्निर्यं न वेद, अग्निर्यस्य शरीरम्, योऽग्निमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(५) यो वायौ तिष्ठन् वायोरन्तरः, वायुर्यं न वेद, वायुर्यस्य शरीरम्, यो वायुमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः।

(६) योऽन्तरिक्षे तिष्ठन् अन्तरिक्षादन्तरो यमन्तरिक्षं न वेद, यस्य अन्तरिक्षं शरीरम्, योऽन्तरिक्षमन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः।

(७) यो दिवि तिष्ठन् दिवोऽन्तरः, यं द्यौर्न वेद, यस्य द्यौः शरीरम्, यो दिवमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः।

(८) य आदित्ये तिष्ठन् आदित्यादन्तरः, यमादित्यो न वेद, यस्यादित्यः शरीरम्, य आदित्यमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः।

(९) यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरः, यं दिशो न विदुर्यस्य दिशः शरीरम्, यो दिशीऽन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः ।

(१०) यश्चन्द्रतारके तिष्ठन् चन्द्रतारकादन्तरः, यं चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरम्, यश्चन्द्रतारकमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः ।

(११) य आकाशे तिष्ठन् आकाशादन्तरः, यमाकाशो न वेद, यस्याऽऽकाशः शरीरम्, य आकाशमन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः ।

(१२) यस्तमसि तिष्ठन् तमसोऽन्तरः, यं तमो न वेद, यस्य तमः शरीरम्, यस्तमोऽन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः ।

(१३) यस्तेजसि तिष्ठन् तेजसोऽन्तरः, यं तेजो न वेद, यस्य तेजः शरीरम्, यस्तेजोन्तरो यमयति, एष त आत्मा अन्तर्याम्यमृतः ।

इत्यधिदैवतम् । बृहदारण्यकोपनिषत् । ३।७।३—१४ ।

तथाच एतदेव चिद्वस्तु श्रीरामः सर्वासु देवतास्वन्तर्यामित्वेन विद्यते यतस्तत एव ताः सर्वा देवताः स्वाधिकारेषु चेष्टन्ते इति प्रकृते भावनीयम् । अतश्च "आत्मजन्मानः" (१) "कर्मजन्मानः" (२) इत्यादि महर्षि-यास्कदृष्ट-देवतालक्षणमत्र सुसङ्गतमिति प्रणिधातव्यम् ॥* (क्रमशः)

---

* यथा, अथ किमथमोश्वराः सन्तो देवता जायन्ते ? इति "कर्म-जन्मानः" कर्मफलसिद्धये, लोकस्य अग्निवायुसूर्या जायन्ते, न हि एतेभ्य ऋते लोकस्य कर्मफलसिद्धिः स्यात्—विद्यमानमस्यैश्वर्यमैश्वर्यवति न प्रख्याति-मियादीशितव्यमर्थमप्रतील्य, तस्मादैश्वर्यख्यापनाय जायन्ते ।"

"कर्म्मफलसिद्धैय लोकमनुजिघृक्षन्तः कुतः पुनर्जायन्ते ? "आत्मजन्मानः" योऽसावेक आत्मा बहुधा स्तूयत इति—उपात्तसर्वमूर्त्तिः स्थितौ, उपरतसर्व-मूर्त्तिः प्रलये, भावाख्यः सन्मात्रः सर्गकाले षोढात्मानं विभज्य जगद्भावं बिभर्त्ति—तस्माज्जायन्ते इति "आत्मजन्मानः ।"

वेदनिरुक्ते दैवतकाण्डे उद्धृतदेवतालक्षणभाष्यव्याख्यानं द्रष्टव्यम्

कलिकाता ओरियेण्टाल सिरिज

१। **युक्तिकल्पतरुः**—महाराजश्रीभोजविरचितः। पण्डितश्रीईश्वरचन्द्रशास्त्रिसांख्य-वेदान्त-न्याय-दर्शनतीर्थेन संशोधितः। अत्र राजनीतिः, गृह-दुर्ग-नगरादिनिर्माणम्, छत्र-ध्वजचामरालङ्कारादिनिर्णयः, मणिरत्नाश्वगजादिपरीक्षा, शस्त्र-नौका-यानादिलक्षणानि च सविशेषं निरूपितानीति तत्तद्विषयमनुसन्धित्सूनां महोपयोगोऽयं ग्रन्थः—२॥०

२। **चाणक्यराजनीतिशास्त्रम्**—विद्वद्वर-जोहान फ्रान् ष्यानेन-कृताङ्गलभूमिका-समेतम्—॥।≈०

३। **मुक्ताफलम्**—वोपदेवविरचितम् हेमाद्रिकृतटीकासहितम् वैष्णवानामत्युपादेयतया परिगृहीतं भागवततत्त्वरत्नमिदं डाः श्रीनरेन्द्रनाथ लाहा, पि-एइच. डि. लिखितबृहदाङ्गल-भूमिकया समलङ्कृतम् खण्डद्वयात्मकम्—६

४। **चाणक्यकथा**—रविनर्त्तकविरचिता। विशाखदत्तकृत-मुद्राराक्षससंवादिनीयं कथा सुललितपद्यमयी (द्वितीयाङ्कनावृत्तिः)—१

५। **वक्रोक्तिजीवितम्**—श्रीराजानककुन्तलविरचितं स्वोपज्ञवृत्तिसमेतमतिप्रमाणभूत-मलङ्कारशास्त्रम्, डाः श्रीसुशीलकुमार दे, डि. लिट्. महोदयेन संशोधितम्—३॥०

६। **पद्मपुराणम्**—स्वर्गखण्डस्य पञ्चाध्यायात्मकः शकुन्तलोपाख्यानम् पातालखण्डस्यैका-दशाध्यायात्मक-रघुवंशवर्णनञ्चात्र वङ्गदेशोपलब्धहस्तलिखितमादर्शमाश्रित्य संशोधितमध्यापक-श्रीहरदत्तशर्म्मणा सुबृहदाङ्गलभाषामयभूमिकायां प्रमाणीकृतञ्च कालिदासीयशकुन्तल-रघुवंशयोर्वीजभूतत्वं पद्मपुराणस्य—२

७। **जयमङ्गला**—श्रीशङ्कराचार्यविरचिता। ईश्वरकृष्णकृतसांख्यसप्ततिग्रन्थस्य टीकेयं श्रीहरदत्तशर्म्मणा संशोधिता—२

८। **योगचिन्तामणिः**—श्रीशिवानन्दसरस्वतीकृतिरतिप्राचीनो ग्रन्थोऽयं योगशास्त्रा-म्बुधिरिति शक्यते वक्तुम्—३

৯। **ব্রহ্মসূত্রম্**—শ্রীমদ্ভাগবতভাষ্যসমেতম্। "অর্থোঽয়ং ব্রহ্মসূত্রাণাং শ্রীমদ্ভাগবতাভিধঃ" ইতি গারুড়বচনস্য যাথার্থ্যং প্রদিদর্শয়িষতা পণ্ডিত-শ্রীহরি-দাসবিদ্যাবাগীশেনাত্র শ্রীমদ্ভাগবতগ্রন্থাদুদ্ধৃতা গ্রন্থাংশব্রহ্মসূত্রভাষ্যতয়া নিরূপিতাঃ, ব্রহ্মসূত্রাণি চ বঙ্গভাষয়া বিশেষেণ ব্যাখ্যাতানি—২॥০

प्राप्तिस्थानम्—

कलकाता ओरयेण्टाल बुक एजेन्सी

९ पञ्चानन घोष लेन, कलिकाता।

भाषारत्नम्

श्रीकणादतर्कवागीश-प्रणीतो नव्यन्यायमतसिद्ध-पदार्थ-
प्रतिपादको ग्रन्थः

कलिकाता-राजकीयसंस्कृतमहाविद्यालयन्यायशास्त्रान्यतराध्यापक-

श्रीकालीपदतर्काचार्य-

सम्पादितम्।

एष ग्रन्थः सरलया सरण्या तर्कशास्त्रप्रसिद्धान् पदार्थान् प्रतिपादयन् सुबहुप्राचीनकालात् प्रभृत्येव पण्डितसमाजे सुविश्रुतो लक्ष्यते। अत्र पदार्थसिद्धौ समपेक्षिता युक्तयः सुगमया दिशा परिगृहीता महान्तमुपकारं जनयन्ति तर्कशास्त्रं प्रविविक्षताम्। विद्यार्थिनां सुखेनावगमाय सम्पादकमहोदयेनात्र सरला काचित् **टीकापि** संयोजिता। अत्र विस्तृता **विषयसूची** भूमिकायां न्यायमतसिद्धानेक-**पारिभाषिक-पदार्थविवृतिश्च** सन्निवेशिता, येन संस्करणस्यास्य नितरामुत्कर्षः समजनि।

एष ग्रन्थ इतः पूर्वं कदापि केनापि न प्रकाशितः। अतः अप्रकाशितपूर्वस्यास्य ग्रन्थस्य परमोपादेयस्य लाभेन विद्यार्थिनः अध्यापकाश्च सुतरामुपकृता भविष्यन्तीति निःसंशयो वादः।

२५४ पृष्ठात्मकोऽयं ग्रन्थः साम्प्रतमेव प्रकाशितः, तत् सत्वरा भवन्तु श्रीमन्तस्तर्कपदार्थविज्ञानरसिका येन कालातिक्रमो नाभिलषितसिद्धिं प्रतिबध्नीयात्।

मूल्यम् { साधारणानाम्—३॥० / परिषत्सदस्यानाम्—३ }

अस्य प्राप्तिस्थानम्—

संस्कृत-साहित्य-परिषत्-कार्यालयः

१७ आर. जि. कर रोड, श्यामबाजार, कलिकाता।

